**38a** ॰स्थाश्चिक्षिपुः ] $S_2S_3RA_3Bh$, ॰स्था विक्षिपुः $S_1$ **38ab** ॰शांस्तांश्च ] $S_1S_2R$, ॰शांस्ताश्च $S_3$, ॰शांस्तांन्स Bh (typo, conj.) • चिच्छेद ] $S_1^{pc}S_2S_3Bh$, विच्छेद $S_1^{ac}$ • माधवः ] $S_2S_3R$**A**$Bh$, माधव $S_1$ **38c** विद्रावया॰ ] $S_2R$**A**$Bh$, विप्रावया॰ $S_1$, विद्रावय॰ $S_3$ (unmetrical) **38d** दानवान्केसरी ] $S_2$, दानवाष्कुसरी $S_1$, दानवा केसरी $S_3$, दानवान् केशरी Bh **39c** पार्श्वं ] $S_1RBh$, पा⏑न् $S_2^{ac}$, पास्वन् $S_2^{pc}$, पार्वं $S_3$ **39d** चाकथयंस्त॰ ] $S_1S_2^{pc}RBh$, च कथयस्त॰ $S_2^{ac}S_3$ **40b** ॰र्बली ] $S_1S_2^{pc}S_3R$**A**$Bh$, ॰र्बलि $S_2^{ac}$ **40c** ॰मास्थाय ] $S_1S_2RBh$, ॰मास्था $S_3$ (unmetrical) • संनद्धो ] $S_1S_2R$, स नद्धो $S_3$ (unmetrical), सन्नद्धा Bh (typo) **40d** ॰द्रवद्रुषा ] $S_2S_3RBh$, ॰द्रवनुषाः $S_1$ (unmetrical) **41a** रथः ] $S_1RBh$, रथं $S_2$, रथ $S_3$ (unmetrical) **41c** संभ्राम्य पातितस्तूर्णं ] $S_2Bh$, संभ्रामपतितस्तूर्ण्णं $S_3$ **42a** दैत्यः ] $S_2^{pc}RBh$, दैत्य $S_1S_2^{ac}S_3$ **42b** ॰त्संरक्त॰ ] $S_1S_2Bh$, ॰त्सरक्त॰ $S_3$ (unmetrical) **42d** नृसिंहाय ] $S_1S_3R$**A**$Bh$, नृसिङ्हय $S_2$ (unmetrical) **43a** अथ सः ] $S_1$, अथ सं॰ $S_2^{pc}$, अथ त सः $S_2^{ac}$ (unmetrical), अथ स $S_3$ (unmetrical), अथासौ Bh (conj.) **43c** मृद्भाण्ड ] $S_1S_3RA_3A_4$, मृद्गाण्ड $S_2$, मृत्खण्ड Bh (conj.) • पाषाणे ] $S_1S_2S_3^{pc}RA_3A_7Bh$, पाशाणे $S_3^{ac}$ **43d** क्षिप्तश्चूर्णं ] $S_2Bh$, क्षिप्तं चूर्ण्णं $S_1$, क्षिप्तचूर्ण्णं $S_3$ **44a** तदा ] $S_1S_2^{pc}S_3R$**A**$Bh$, (न)दा $S_2^{ac}$ **44b** ॰कशिपुं ] $S_2R$**A**, ॰कशिपुः $S_1$, ॰कशिपु $S_3$ (unmetrical), ॰शिपुं Bh (typo, unmetrical) **44c** ॰नाहत्य ] $S_1R$**A**$Bh$, ॰नाहन्य $S_2S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

सिंहनादं महत्कृत्वा नखैर्वज्रमयैर्विभुः।
उरो बिभेद दैत्यस्य महाशैलोपमं हरिः॥ ४५॥
हते तस्मिन्महादैत्ये विष्णुना शक्तिनन्दन।
दानवा न हता ये तु विविशुस्ते रसातलम्॥ ४६॥
देवराज्यं पुनः शक्रो लेभे निष्कण्टकं महत्।
दिवौकसश्च सर्वे ते स्वानि राज्यानि भेजिरे॥ ४७॥
अथागत्य ततो देवः शूलपाणिर्वृषध्वजः।
सुरैर्विज्ञापितो व्यास यत्ते कथितवानहम्॥ ४८॥
विष्णोस्त्याजयितुं रूपं सिंहमद्भुतकर्मणः।
शरभः स तदा भूत्वा हिमवच्छिखरोपमः॥ ४९॥
चतुर्भिः पृष्ठजैः पादैस्तीक्ष्णदंष्ट्रो महाबलः।
नरसिंहसमीपं तु गत्वागर्जत्समाहितः॥ ५०॥
अथ सिंहस्तदा दृष्ट्वा शरभं समुपस्थितम्।
क्रोधेन महताविष्टो तलेनैनमताडयत्॥ ५१॥

---

**46ab** ] om. R **46c** न हता ये तु ] निहताः पेतुर् R **47b** निष्कण्टकं ] निष्कण्डकम् R **47c** °श्च ] °स्तु R **47d** स्वानि ] तानि R **49c** शरभः ] सरभः R **50c** नरसिंहसमीपं तु ] नारसिंहसमीपञ्च R **50d** °त्समाहितः ] °त्स लीलया R **51cd** °विष्टो त° ] विष्णुस्त° R **51d** °नैनम° ] °नैवम° R

---

**45b** °र्वज्रमयैर् ] °र्वज्र{वर्ज्रं° $A_7$}मयो **A** **46b** शक्तिनन्दन ] शक्रनन्दिना **A** **46c** ये तु ] $A_3A_7$, पेतु+ः+ $A_4$ **47d** स्वानि ] $A_3$, स्वामि° $A_4A_7$ **48b** °ध्वजः ] $A_3A_4$, °ध्वज $A_7$ **48d** °वानहम् ] $A_3A_4$, °वाहनं $A_7$ **49ab** ] om. **A** **49c** शरभः ] $A_4^{pc}$, सरभः $A_3A_4^{ac}A_7$ **49d** °रोपमः ] $A_3A_4$, °रो पुरा $A_7$ **50a** चतुर्भिः ] ततार $A_3$, तत्ताड $A_4$, तडागः $A_7$ **50ab** पृष्ठजैः पादैस्ती° ] पृ{प्र° $A_7$}ष्ठतः क्रोडे ती° **A** **50c** नरसिंह° ] नारसिंह° $A_3A_4$, नारसिहं $A_7$ (unmetrical) • °समीपं ] $A_4A_7$, °समींपं $A_3$ **50d** °गर्जत्समाहितः ] तर्जन{तज्जल° $A_7$}लीलया **A** **51a** °स्तदा ] $A_3A_4$, °स्त+था+ $A_7$ **51b** शरभं ] $A_4^{pc}$, सरभं $A_3A_4^{ac}A_7$ **51c** °विष्टो त° ] विष्णुस्त° **A** **51d** °नैनमता° ] $A_3A_4$, °नैव ता° $A_7$ (unmetrical)

---

**45a** °नादं ] $S_2S_3$R**A**Bh, °नादां $S_1$ **45b** नखैर्वज्रमयैर् ] $S_1S_2$RBh, नखै वज्रमयै $S_3$ **45d** हरिः ] $S_2S_3^{pc}$R**A**Bh, हरिम् $S_1$, हरि $S_3^{ac}$ **46a** हते ] $S_1S_3$**A**Bh, हतौ $S_2^{ac}$, हतो $S_2^{pc}$ **46b** °नन्दन ] $S_2^{pc}$Bh, °नन्दनः $S_1S_2^{ac}S_3$ **46c** न हता ] $S_2^{pc}S_3$**A**Bh, निहता $S_1$, ⟨ह⟩+न+ हता $S_2$ **47a** देवराज्यं ] $S_2$R**A**, देवराजं $S_1S_3$, दिवो राज्यं Bh (conj.) **47c** ते ] $S_1S_2^{pc}S_3$R**A**Bh, om. $S_2^{ac}$ (unmetrical) **48a** देवः ] $S_1$R**A**Bh, देवा $S_2S_3$ **48b** °पाणिर्वृषध्वजः ] $S_1$R$A_3A_4$Bh, °पाणिम्वृषध्वजं $S_2$, °पाणिवृषध्वजं $S_3$ **48c** सुरैर् ] $S_1S_2$R**A**Bh, सुरै $S_3$ **48d** यत्ते ] $S_1S_2$R**A**Bh, यन्ने $S_3$ • °वानहं ] $S_1S_2^{pc}S_3$R$A_3A_4$Bh, °वा⟨ह⟩+न+हं $S_2$ **49a** विष्णोस्त्या° ] $S_2$RBh, विष्णो त्या° $S_1S_3$ **49b** सिंहम° ] $S_1S_3$R, सैङ्हम° $S_2$, सैंहंम° Bh (typo) • °कर्मणः ] $S_1^{ac}S_2S_3$RBh, °कर्म्मण $S_1^{pc}$ **49c** शरभः ] $S_1S_2A_4^{pc}$Bh, शरभ $S_3$ (unmetrical) **49d** °रोपमः ] $S_1$R$A_3A_4$Bh, °रोपमं $S_2$, °रोपमम् $S_3$ **50a** चतुर्भिः पृष्ठजैः ] $S_2$RBh, चतुर्भिर्वृष्ठजै $S_1$, चतुभि पृष्टजै $S_3$ (unmetrical) **50ab** पादैस्तीक्ष्ण° ] RBh (em.?), पादै तीक्ष्ण° $S_1$, पादैरष्ट° $S_2S_3$ • °दंष्ट्रो ] $S_2$R**A**Bh, °दंष्ट्रम् $S_1$, °द्रष्ट्रो $S_3$ **50c** °समीपं तु ] $S_1^{pc}S_2S_3A_4A_7$Bh, °समीपंन्तु $S_1^{ac}$ **50d** °गर्जत् ] $S_1S_2$RBh, °गर्ज $S_3$ **51a** सिंहस्तदा ] $S_1S_2^{pc}S_3$R$A_3A_4$Bh, सिङ्ह ⌣दा $S_2^{ac}$ **51cd** °विष्टो त° ] $S_1S_2S_3$, °विष्टस्त° Bh (em.) **51d** °नैनम° ] $A_3A_4$Bh, °नैवम° $S_1S_2S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

स हतस्तेन सिंहेन शरभो नैव चुक्षुभे।
ततः शरभमाहत्य वज्रदेहं महाबलम्।
आत्मनैवागमत्कृच्छ्रं स्पर्शात्तस्य महात्मनः॥ ५२॥
ततो विष्णुश्चिरं ध्यात्वा ज्ञात्वा शंकरमागतम्।
प्रणम्य शिरसा तस्मै स्तोत्रमेनं प्रचक्रमे॥ ५३॥
नमः शर्वाय रुद्राय सेनान्ये सर्वदाय च।
नमः परमदेवाय ब्रह्मणे परमाय च॥ ५४॥
कालाय यमरूपाय कालदण्डाय वै नमः।
नमः कालान्तकर्त्रे च कालाकालहराय च॥ ५५॥
नमः पिनाकहस्ताय रौद्रबाणधराय च।
चण्डाय वामदेवाय सर्वयोगेश्वराय च॥ ५६॥
नमो विद्याधिपतये ब्रह्मणः पतये नमः।
नमो ऽसुरवरघ्नाय कालचक्राय वै नमः॥ ५७॥
संवर्तकाग्निचक्राय प्रलयान्तकराय च।
नरनारायणेशाय नरनारायणात्मने॥ ५८॥

---

**52a** ◦स्तेन ] ◦स्तस्य R **52e** आत्मनैवागमत्कृच्छ्रं ] आत्मनो वागमत् कृत्स्नं R **53a** ततो विष्णुश्चिरं ध्यात्वा ] सुसुप्तोत्थितवद्विष्णुर् R **53d** ◦मेनं ] ◦मेतत् R **54a** शर्वाय रुद्राय ] सर्व्वाय देवाय R **54d** ब्रह्मणे ] ब्रह्मणः R **57c** नमो ऽसुर◦ ] नमः सुर◦ R

---

**52b** शरभो ] $A_4$, सरभो $A_3A_7$ **52c** शरभ◦ ] $A_4^{pc}$, सरभ◦ $A_3A_4^{ac}A_7$ **54a** शर्वाय ] $A_3$, सर्वाय $A_4A_7$ • रुद्राय ] $A_3A_7$, रूद्राय $A_4$ **54b** सेनान्ये ] $A_3$, सेनान्यै $A_4A_7$ **55ab** ] om. **A** **55c–56d** ] om. $A_4$ **55d** कालाकाल◦ ] $A_3$, कालकाल◦ $A_7$ **56cd** ] चंद्राननाय देवाय ससर्वयोगेश्वराय च $A_3$ (unmetrical), चण्डालनामरु सेनाद्यै सर्व्वदाय $A_7$ (unmetrical, cf. 54ab) **57cd** ] om. **A** **58a** ◦चक्राय ] ◦वक्त्राय $A_3$, ◦वक्राय $A_4A_7$

---

**53**($d^4$) $S_1$ **55**($a^7$–$a^8$) $S_1$ **58**($b^5$–$b^6$) $S_1$

---

**52b** शरभो ] $S_2S_3$R$A_4$Bh, शरभे $S_1$ **52d** ◦देहं ] $S_1S_2$R**A**Bh, ◦देह◦ $S_3$ • महाबलम् ] $S_2S_3$R**A**Bh, महाबलः $S_1$ **52e** ◦वागमत् ] $S_2$R**A**Bh, ◦वागमं $S_1$, ◦वागम $S_3$ (unmetrical) **52f** स्पर्शात्त◦ ] $S_1S_2$R**A**Bh, स्पशात्त◦ $S_3$ **53c** तस्मै ] $S_1S_2S_3$R**A**, तं वै Bh (conj.) **53d** स्तोत्रमेनं ] $S_2S_3$**A**, स्तोतुमे(व)म् $S_1$, स्तोतुमेवं Bh • ◦चक्रमे ] $S_1S_2^{pc}S_3$R**A**Bh, ◦चक्रमेः $S_2^{ac}$ **54a** रुद्राय ] $S_1S_2$R$A_3A_7$Bh, रूद्राय $S_3$ **54b** सर्वदाय ] $S_1$R**A**, शर्मदाय $S_2S_3$Bh **54c** नमः ] $S_1^{pc}S_2S_3$R**A**Bh, नम $S_1^{ac}$ (unmetrical) **55a** यम◦ ] $S_2S_3$RBh, मम $S_1$ **55d** कालाकाल◦ ] $S_1$R$A_3$, काले काल◦ $S_2S_3$Bh **56b** रौद्र◦ ] $S_1S_2$R$A_3A_7$Bh, रैद्र◦ $S_3$ **57d** वै ] $S_1S_2S_3$R, ते Bh (conj.) **58c** ◦णेशाय ] $S_2S_3$R**A**Bh, ◦णेशेय $S_1$ **58d** ◦नारायणात्मने ] $S_1S_2$R**A**Bh, ◦नारायणेत्मने $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

ममैव वरदात्रे च सर्वकामप्रदाय च।
शरभाय सुरूपाय व्याघ्रचर्मसुवाससे॥ ५९॥
नन्दीश्वरगणेशाय गणानां पतये नमः।
इन्द्रियाणामथेशाय मनसां पतये नमः॥ ६०॥
नमः प्रधानपतये सुराणां पतये नमः।
नमो ऽस्तु भावपतये तत्त्वानां पतये नमः॥ ६१॥
चराचरस्य पतये भूतानां पतये नमः।
त्रैलोक्यपतये चैव लोकानां पतये नमः॥ ६२॥
योगदाय नमो मह्यं तथैवैश्वर्यदाय च।
अवध्यत्वप्रदात्रे च तथैवाजय्यदाय च॥ ६३॥
भगवंस्त्वत्प्रतिष्ठो ऽस्मि त्वन्निष्ठस्त्वत्परायणः।
शरणं त्वां प्रपन्नो ऽहं प्रसीद मम सर्वदा॥ ६४॥
य इमं शृणुयान्नित्यं शुचिः प्रयतमानसः।
स रुद्रलोकमासाद्य देवस्य गणपो भवेत्॥ ६५॥
धन्यं यशस्यमायुष्यं स्वर्ग्यं पापप्रणाशनम्।
श्रावणं श्रवणं चास्य तथानुस्मरणं सदा॥ ६६॥

---

**59c** शरभाय ] सुप्रभावाय R (unmetrical) **63d** ०वाजय्य० ] ०वाजस्य० R **64a** ०स्त्वत्प्रतिष्ठो ] ०स्त्वप्रतिष्ठो R **64b** त्वन्निष्ठ० ] त्वनिष्ठ० R **66b** स्वर्ग्यं ] सुख्यं R

---

**59** ] om. **A** **60b** गणानां ] $A_3A_4$, गणाणां $A_7$ **60c–62b** ] om. **A** **63a** मह्यं ] नित्यं **A** **63b** तथैवै० ] $A_7$, तथैकै० $A_3A_4$ **63c** अवध्यत्व० ] अवध्यत्वं **A** **63d** ०वाजय्य० ] $A_3$, ०वाजप्य० $A_4$, ०वाजर्य्य० $A_7$ **64a** ०वंस्त्वत्प्रतिष्ठो ] ०वंस्त्वं{०स्त्वां $A_3$} प्रतिष्ठो{०ष्टो $A_3A_4$} **A** **64b** ०स्त्वत्परा० ] $A_4A_7$, ०स्त्वपरा० $A_3$ **64c** शरणं ] $A_3A_4$, शरणां $A_7$ **65a** शृणुया० ] $A_3A_4$, शृनुया० $A_7$ **66b** स्वर्ग्यं ] $A_3A_4$, स्वर्गं $A_7$ **66c** चास्य ] $A_7$, चान्यत् $A_3$, चान्य $A_4$

---

**62**($a^3$–$a^4$) $S_1$ **64**($a^5$–$a^6$)⟨$c^1$–$d^8$→⟩ $S_1$

---

**59a** वरदात्रे ] $S_2S_3$RBh, वरदाये $S_1$ **59d** ०चर्मसु० ] $S_1S_2S_3^{pc}$RBh, ०चर्म्म(षु०) $S_3^{ac}$ **60bc** ] om. $S_1$ **60b** गणानां ] $S_2S_3^{pc}RA_3A_4$Bh, गणनाम् $S_3^{ac}$ **60d** मनसां प० ] $S_1S_2S_3$R, मनसस्प० Bh (conj.) **62a** चराचरस्य ] $S_1$R, सचराचरस्य $S_2S_3$ (hypermetrical), चराचराणां Bh (conj.?) **63b** ०थैवैश्वर्य० ] $S_2RA_7$Bh, ०थैवेश्वर्य० $S_1$, ०थैवैश्ववे० $S_3$ (unmetrical) **63c** अवध्यत्व० ] $S_1S_3$R Bh, अवध्यत्वं $S_2$ **63d** ०वाजय्यदाय ] $A_3$, ०वायाव्ययाय $S_1$, ०वाजप्यदाय $S_2$Bh, ०व याम्यदाय $S_3$ **64a** ०त्प्रतिष्ठो ऽस्मि ] $S_1$Bh, ०त्प्रतिष्ठो स्मिन् $S_2$, ०त्प्रतिष्टो स्मिं $S_3$ **64b** ०ष्ठस्त्वत्परायणः ] $S_2^{pc}S_3RA_4A_7$Bh, ०ष्ठ त्वत्पराय⟨(णे)⟩+ण॥+ $S_1$ (ण in a second hand), ०ष्ठस्त्वपरायणः $S_2^{ac}$ • After this $S_1$ adds तं लं वै and an insertion mark in a second hand. It omits the rest of the chapter with the colophon and continues with the beginning of chapter 72. **64c** शरणं ] $S_2RA_3A_4$Bh, शरण $S_3$ **65a** शृणुयान् ] $S_2^{pc}RA_3A_4$Bh, शृणुया $S_2^{ac}S_3$ **65b** शुचिः ] $S_2$RABh, शुचि $S_3$ **66a** ०मायुष्यं ] $S_2$RABh, ०मायुश्यं $S_3$ **66b** स्वर्ग्यं ] $S_2A_3A_4$Bh, स्वर्ग्गं $S_3$ **66d** ०णं सदा ] RABh, ०णन्तदा $S_2S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

सनत्कुमार उवाच।
स एवं स्तूयमानस्तु विष्णुना भुवनेश्वरः।
हृषीकेशमुवाचेदं वचः परमपूजितम्॥ ६७॥
तुभ्यं विष्णो मया दत्तः पुण्यो ह्येष वरः शुभः।
अयोनौ सज्जमानस्य स्वयोनौ प्रतिपादनम्॥ ६८॥
स त्वं विष्णुर्महातेजा मत्तो लब्धवरः सदा।
वेलायां त्वं समुद्रस्य तिर्यग्योनिमसूत यः॥ ६९॥
कृतं कार्यं त्वया सर्वं हिरण्यकशिपुर्हतः।
एहि गच्छ शुभां योनिमात्मनः परमाद्भुताम्॥ ७०॥
ततस्तमाक्रमत्पादैः सिंहं शरभसत्तमः।
अयोजयच्च देहेन पुनर्दिव्येन केशवम्॥ ७१॥
विष्णवे ऽथ वरं दत्त्वा दैत्यघ्नं स वृषध्वजः।
प्रकृतिस्थो भवेत्युक्त्वा तत्रैवान्तरधीयत॥ ७२॥

---

**67a** स एवं ] एवं सं° R **68b** पुण्यो ह्येष ] प्रषह्येषा{°षो $R^{ac}$} R **68c** अयोनौ सज्जमानस्य ] स्वयोनौ सजन्मनस्य R **69c** त्वं ] त्वां R **69d** °मसूत यः ] °मभूयत R **71b** °सत्तमः ] °वत्तमः R **71d** पुनर्दिव्येन ] पुनाति स +च+ R **72a** विष्णवे ऽथ ] विष्णुरेष R **72b** दैत्यघ्नं स वृषध्वजः ] दैत्यशत्रुं वृषध्वज R

---

**67a** स एवं ] एवं स $A_3A_4$, एवं सं° $A_7$ **68b** पुण्यो ] पुरा **A** **68c** सज्जमानस्य ] जायमानस्य **A** **68d** °पादनम् ] °पालनम् $A_3A_7$, °पालयं $A_4$ **69a** विष्णुर् ] विष्णोर् $A_4A_7$, विष्णो $A_3$ **69c** वेलायां त्वं ] $A_3A_4$, वेलायांस्त्वां $A_7$ • समुद्रस्य ] $A_3$, समुद्रस्तु $A_4A_7$ **69d** °ग्योनिमसूत यः ] °ग्योनौ प्रसूत यः $A_4$, °ग्योनौ प्रसूयत $A_3A_7$ **71a** °माक्रमत्पादैः ] °माक्रोश स वै $A_3$, °माक्रोश सर्वैः $A_4$, °माक्रोस्यमत् शवै $A_7$ (unmetrical) **71b** सिंहं ] $A_4A_7$, सिंह $A_3$ (unmetrical) • शरभ° ] $A_4$, सरभ° $A_3A_7$ **71c** अयोजयच्च ] अयोजयतु $A_3$, अजोजयतु $A_4$, अयोजयत्तु $A_7$ **72b** स ] तं **A** • वृषध्वजः ] $A_3A_4$, वृषध्वज $A_7$

---

**69**($d^7$) $S_3$

---

**67c** °मुवाचे° ] $S_2S_3$R**A**, °मुाचे° Bh (typo) **67cd** °दं वचः ] $S_2^{pc}$R**A**Bh, °दं वरः $S_2^{ac}$, °दम्वरः $S_3$ **68a** दत्तः ] $S_2$R**A**Bh, दत्त $S_3$ **68b** पुण्यो ] $S_2$Bh, पुण्यै $S_3$ **68c** सज्जमानस्य ] $S_2^{ac}S_3$ Bh, सज्जमानश्च $S_2^{pc}$ **69a** विष्णुर्महातेजा ] $S_2$RBh, विष्णु महातेज $S_3$ **69b** °वरः ] $S_2$R**A**Bh, °रर $S_3^{ac}$ (unmetrical), °वर $S_3^{pc}$ (unmetrical) **69c** वेलायां ] $S_2$R**A**Bh, वेलाया $S_3$ • त्वं ] $S_2^{pc}A_3A_4$, त्वा $S_2^{ac}S_3$, त्वां Bh (conj.) • समुद्रस्य ] R$A_3$, समुद्रस्तु $S_2S_3$Bh **69d** °मसूत यः ] $S_2S_3^{pc}$Bh, °मसू⟨य⟩+(त)+ यः $S_3$ **70a** कार्यं ] $S_2$R**A**Bh, कार्य $S_3$ **70c** शुभां ] $S_2$R**A**Bh, शुभा $S_3$ **70d** °मात्मनः ] $S_2$R**A**Bh, °मात्मन $S_3$ (unmetrical) **71ab** °त्पादैः सिंहं ] RBh (em.?), °त्पादैस्सिंहाङ् $S_2$, °त्पादै सिंहा $S_3$ **71c** अयोजयच्च ] $S_2^{pc}$RBh, अयोजयश्च $S_2^{ac}S_3$ **72b** वृषध्वजः ] $S_2^{pc}A_3A_4$Bh, वृषध्वजम् $S_2^{ac}S_3$ **72d** °रधीयत ] R**A**Bh, °रधीयतः $S_2^{pc}S_3$, °रधीयता $S_2^{ac}$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

दत्त्वा तस्मै वरमनुपमं विष्णवे लोकधाता
   दैत्यघ्नत्वं सुरपुरवधूलोचनैः पीयमानः।
नीलाम्भोदद्युतिनिभमुरः प्रोद्वहञ्छूलपाणि-
   र्धाम स्वाक्यं परममुनिभिर्वन्द्यमानो जगाम॥ ७३॥

इति स्कन्दपुराण एकसप्ततितमो ऽध्यायः॥ ७१॥

---

**73a** ॰धाता ] ॰धात्रे R **73b** ॰त्वं सुरपुरवधू॰ ] ॰त्वं असुरवरधृक् R **73c** ॰मुरः प्रोद्वहञ्छू॰ ] ॰सुरः प्रोद्वहच्छू॰ R **73cd** ॰णिर्धाम स्वाक्यं ] ॰णिः। वामस्वाद्यं R **Col.** इति स्कन्दपुराणे रेवाखण्डे शरभरूपधारणो नामो ऽध्यायः R

---

**73a** दत्त्वा ] इदं दत्त्वा **A** (unmetrical) • ॰मनुपमं ] ॰मथ परमं $A_3$ (unmetrical), ॰मथ $A_4$ (unmetrical), ॰मपरमं $A_7$ **73b** दैत्यघ्नत्वं सुरपुरवधू॰ ] दैत्यघ्नं सुररिपु॰ **A** (unmetrical) **73c** ॰द्युति॰ ] ॰द्योति॰ **A** (unmetrical) • ॰मुरः प्रोद्वहञ्छू॰ ] ॰वपुः प्रोद्वहं शू॰ **A** **73d** स्वाक्यं ] स्वाद्यं **A** **Col.** इति{इति श्री॰ $A_3$} स्कन्दपुराणे एकाशीतिसाहस्र्यां संहितायामम्बिकाखण्डे शरभरूपधरणो{॰धरो $A_7$} नामाध्यायः **A**±

---

**73a** ॰मनुपमं ] $S_2$RBh, ॰मनुपम $S_3$ (unmetrical) **73c** ॰द्युतिनिभ॰ ] $S_2^{pc}S_3$R**A**Bh, ॰द्युनितिभ॰ $S_2^{ac}$ • ॰मुरः ] em. Bh (silently), ॰मुर $S_2$, ॰मुन $S_3$ • प्रोद्वहञ्छू॰ ] em. (cf. **A**), प्रोद्वहच्छू॰ $S_2S_3$Bh **73d** स्वाक्यं ] $S_2S_3$, स्वीयं Bh (conj.) **Col.** स्कन्दपुराणे सप्तमो{॰र्यो $S_2^{ac}$} ध्यायः॥ ⊙ $S_2$, ⊙ ॥ स्कन्दपुराणे नामाध्याय ७० (in letter numerals)॥ ⊙ $S_3$, इति स्कन्दपुराणे हिरण्यकशिपूपाख्याने शरभकृतनरसिंहोद्धाराख्यानं नाम एकसप्ततितमो ध्यायः Bh

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

# द्विसप्ततितमो ऽध्यायः।

व्यास उवाच।
भगवन्सर्वयोगज्ञ श्रुतमाख्यानमुत्तमम्।
परतः श्रोतुमिच्छामि यद्वृत्तं मुनिसत्तम॥ १॥
अपनीय तदा विष्णोः सिंहरूपं वृषध्वजः।
किमन्यदकरोद्धीमानेतदिच्छामि वेदितुम्॥ २॥
सनत्कुमार उवाच।
स्वयोनिं विष्णुमानीय देवदेवो भवस्तदा।
मन्दरे सहितो देव्या विचचार महाद्युतिः॥ ३॥
रम्यान्स काननोद्देशान्गिरेः प्रस्रवणानि च।
अलंचकार देवेशः परिसर्पन्समन्ततः॥ ४॥
वनप्रेक्षारतिं देवं ज्ञात्वा शंकरमव्ययम्।
शरत्तत्र वसन्तश्च द्वावृतू समुपस्थितौ॥ ५॥

---

**1a** ॰योगज्ञ ] ॰धर्म्मज्ञ R **2c** किमन्यद॰ ] किमन्यम॰ R **4ab** ] रम्यान् स+र्वतुणान्+ देशान् गिरेश्च पवनानि च R **5a** वनप्रेक्षारतिं ] वने प्रमथनं R **5c** शरत्तत्र वसन्तश्च ] शरस्तत्र व(श)न्तश्च R

---

**1a** ॰योगज्ञ ] ॰तत्वज्ञ **A** **1b** श्रुतमाख्यानमु॰ ] तमाख्यानमनु॰ **A** **1d** यद्वृत्तं ] $A_3A_7$, यद्वृत्त $A_4$ **2c** किमन्यद॰ ] किमन्यत॰ $A_7$, किमेतद॰ $A_3$, किंमेतद॰ $A_4$ **3a** स्वयोनिं ] अयोनिं $A_3$, अजोनिं $A_4$, अयोनीं $A_7$ **3b** भवस्त॰ ] भवत्त॰ **A** **4a** ॰नोद्देशान् ] $A_3A_7$, ॰नोद्देशा $A_4$ **5a–6b** ] om. **A**

---

Manuscripts available for this chapter: $S_1$ (upto **13 b**[6] and from **42 a**[1] to **118 d**[8]; f. 117 and 120 lost) photos 2.4b (f. 116[v]), 2.4a (f. 118[r]), 2.3 (f. 118[v]), 6.22a (f. 119[r]) and 6.21b (f. 119[v]); $S_2$ exposures 100a–104a (f. 107[v]–111[v]); $S_3$ f. 116[r]–120[r]; R f. 135[v]–140[r]; $A_3$ f. 78[r]–80[v]; $A_4$ f. 111[v]–114[v]; $A_7$ f. 110[r]–113[v].
**3**⟨$b^1$–$b^3$⟩($b^4$–$b^8$) $S_3$

---

**1b** श्रुत॰ ] $S_2S_3$RBh, ब्रुत॰ $S_1$ **1d** यद्वृत्तं ] $S_2RA_3A_7$Bh, य+ः+वृत्तं $S_1$, यद्वृतं $S_3$ • ॰सत्तम ] $S_2^{pc}$R**A**Bh, ॰सत्तमः $S_1S_2^{ac}S_3$ **2a** विष्णोः ] R**A**Bh, विष्णो $S_1S_2S_3$ **2b** सिंह॰ ] $S_1S_2^{ac}S_3$R**A**Bh, सिङ्हे $S_2^{pc}$ • ॰ध्वजः ] $S_2S_3$R**A**Bh, ॰ध्वज $S_1$ **2c** किमन्यदकरोद् ] $S_2S_3$Bh, तमन्यथकरो $S_1$ **2cd** ॰मानेतदि॰ ] $S_2^{pc}S_3$R**A**Bh, ॰मांनेतदि॰ $S_1$, ॰मानेददि॰ $S_2^{ac}$ **3a** स्वयोनिं ] $S_2$RBh, स्वयोनि $S_1S_3$ **3b** भवस्त॰ ] RBh (conj.?), भयस्त॰ $S_1$, भवत्त॰ $S_2$, (भवत्त॰) $S_3$ **3d** विचचार ] $S_1S_2^{pc}$R**A**Bh, विरचर $S_2^{ac}$ (unmetrical), विचचर $S_3$ (unmetrical) • महाद्युतिः ] $S_2^{pc}$R**A**Bh, महाद्युति $S_1$, महाद्युतिम् $S_2^{ac}S_3$ **4a** रम्यान् ] $S_1S_3$R**A**Bh, रम्यं $S_2$ **4ab** ॰नोद्देशान्गिरेः ] $A_3A_7$Bh, ॰ना-द्देशाः गिरे $S_1$, ॰नोदेशाङ्गिरेः $S_2S_3$ **4c** देवेशः ] $S_2S_3$R**A**Bh, देवेश $S_1$ **4d** ॰सर्पन् ] $S_1S_2$R**A**Bh, ॰सर्प्प $S_3$ **5a** वन॰ ] $S_2^{pc}S_3$Bh, नव॰ $S_1$, वनं $S_2^{ac}$ • ॰प्रेक्षा॰ ] $S_1$Bh, ॰प्रेक्ष॰ $S_2^{pc}S_3$, ॰प्रेक्ष्य॰ $S_2^{ac}$ • ॰रतिं देवं ] $S_2$, ॰रतिन्देवा $S_1$, ॰रतिं देव $S_3$, ॰रतं देवं Bh (conj.) **5c** शरत्तत्र ] em. Bh (silently), शरंगश्च $S_1^{pc}$, शरंग(ज॰) $S_1^{ac}$, सरत्तत्र $S_2^{pc}$, सरत्तत्रे $S_2^{ac}S_3$ • वसन्तश्च ] $S_2$Bh, वसन्तद्य $S_1$, वसन्तश्श $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

ततो महीरुहाः सर्वे सरांसि च समन्ततः।
नानाविधानि पुष्पाणि मुमुचुः सहसा समम्॥ ६॥
कमलोत्पलसंछन्नाः षट्पदव्रातसेविताः।
हंससारससंवासा वाप्यस्तत्र मनोहराः॥ ७॥
गन्धाढ्या जातयः क्षिप्रं बभूवुः सह चम्पकैः।
अशोको गन्धपुष्पश्च तथा चैवातिमुक्तकः।
उपतस्थुः समं देवं सर्वगन्धसुखानिलाः॥ ८॥
सर्वर्तुकुसुमाकीर्णं दृष्ट्वा तद्वनमुत्तमम्।
पुष्पाण्यादाय देवेशः स्वयमेव जगत्पतिः॥ ९॥
अलंचकार हृष्टात्मा देवीं हिमगिरेः सुताम्।
नन्दीश्वरं च पार्श्वस्थमात्मानं च सुरेश्वरः॥ १०॥
ततः प्रणम्य देवेशं पार्वती प्रणयादिदम्।
वचः प्रोवाच जननी कृत्स्नस्य जगतो ऽव्यया॥ ११॥

---

**7c** °संवासा ] °संबाधा R **8a** गन्धाढ्या जातयः ] गन्धाढ्यजातशः R **8c** अशोको ] अशोका R • °पुष्पश्च ] °पुष्पाश्च R **8d** °मुक्तकः ] °मुक्तकाः R **10a** हृष्टात्मा ] दृष्ट्वात्मा R

---

**6d** समम् ] द्रुमाः **A** **7a** °लोत्पलसंछन्नाः ] °लोत्फुल्लसंछन्ना **A** **7b** °व्रात° ] °व्रत° $A_4A_7$, °व्रज° $A_3$ **7c** °संवासा ] °चक्राह्वा **A** **7d** मनोहराः ] मनो{°णो° $A_7$}रमाः **A** **8a** गन्धाढ्या जातयः ] गन्धान्याजह्रि{°जर्हि° $A_4$, °जार्हि° $A_7$}रे **A** **8c** अशोको ] अशोक° **A** • °पुष्पश्च ] °पुष्पाश्च **A** **8d** °मुक्तकः ] °मुक्तका $A_7$, °शुक्रकाः $A_3A_4$ **8e** °स्थुः समं ] °स्थुर्महा° **A** **8f** °खानिलाः ] $A_3$, °खानिलः $A_4$, °खानिला $A_7$ **9a** सर्वर्तु° ] $A_4$, सर्वर्त्त° $A_3$, सर्व्वत्तु° $A_7$ **9c** पुष्पाण्या° ] पुष्पान्या° $A_7$, पुष्पांश्चा° $A_3A_4$ **10a** अलंच° ] $A_3A_4$, अलंञ्च° $A_7$ • हृष्टात्मा ] $A_3A_4$, हृष्ट्वात्मा $A_7$ **11a** ततः ] तत्र **A** **11c** वचः ] $A_4A_7$, वच $A_3$

---

**6**⟨$a^1$–$a^4$⟩($a^5$–$a^8$) $S_3$ **8**($e^5$–$e^6$) $S_2$ **9**($a^1$, $b^3$)⟨$b^4$–$b^5$⟩($b^6$)⟨$b^7$⟩ $S_1$ **11**($b^8$, $d^1$) $S_2$

---

**6a** महीरुहाः ] RBh (em.?), महीरुहा $S_1$, महीरुदा $S_2$, ···(रुह) $S_3$ (upper parts lost) **6d** मुमुचुः ] $S_1S_2$R**A**Bh, मुमुचु $S_3$ (unmetrical) • समम् ] $S_1S_2$RBh, सम $S_3$ **7a** °संछन्नाः ] $S_2^{pc}$RBh, °संछन्ना $S_1S_2^{ac}S_3$ **7b** °व्रात° ] $S_2S_3$RBh, °प्रात° $S_1$ • °सेविताः ] $S_1S_2^{pc}$R**A**Bh, °सेविता $S_2^{ac}S_3^{pc}$, °सिविता $S_3^{ac}$ (unmetrical) **7c** °संवासा ] $S_2S_3$Bh, °संवाहा $S_1$ **7d** वाप्य° ] $S_2^{pc}S_3$R**A**Bh, वाम्य° $S_1$, चाप्य° $S_2^{ac}$ • मनोहराः ] $S_2S_3$RBh, मनोहरा $S_1$ **8c** अशोको ] $S_1$, अशोक° $S_2S_3$, अशोका Bh (em.) • °पुष्पश्च ] $S_1S_2^{ac}S_3$, °पुष्पाश्च $S_2^{pc}$Bh **8d** °मुक्तकः ] $S_1$ $S_2^{ac}S_3$, °मुक्तकाः $S_2^{pc}$Bh **8e** उपतस्थुः ] $S_2$RBh, उपतस्थु $S_1S_3$ **8f** °खानिलाः ] $S_2S_3$R$A_3$Bh, °खानिला $S_1$ **9a** सर्वर्तु° ] $S_1S_2$R$A_4$Bh, सर्वं तु $S_3$ • °माकीर्णं ] $S_1S_2$R**A**Bh, °माकीर्ण्णं $S_3$ **9d** °मेव ] $S_1S_2$R**A**Bh, °मेवा $S_3$ • जगत्पतिः ] $S_2^{pc}S_3$R**A**Bh, जग⟨तः⟩+त्प+ति $S_1$, जत्पतिः $S_2^{ac}$ (unmetrical) **10a** अलंचकार ] $S_2^{pc}S_3$R$A_3A_4$Bh, अलंचकारा $S_1$, अ⟨च⟩लञ्चकार $S_2$ • हृष्टात्मा ] $S_3A_3A_4$Bh, दृष्टात्मा $S_1^{pc}$, दृष्ट्वात्मा $S_1^{ac}$, हृष्ट्वात्मा $S_2$ **10b** देवीं ] R**A**Bh, देवै $S_1$, देवी $S_2S_3$ (anusvāra possibly lost in $S_2$) • °गिरेः ] $S_2^{pc}$R**A**Bh, °गिरैः $S_1$, °गिरे $S_2^{ac}S_3$ **10c** पार्श्वस्थ° ] $S_1S_2$R**A**Bh, पाश्वस्थ° $S_3$ **11a** ततः ] $S_2S_3$RBh, तत $S_1$ **11c** वचः ] $S_2$R$A_4A_7$Bh, वच $S_1S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

यथा मे देहजः पुत्रो भविता गोवृषध्वज।
त्वद्वीर्यस्त्वत्प्रभावश्च सर्वदेवनमस्कृतः।
तथा कुरु महादेव यदि ते प्रियता मयि॥ १२॥
एवमुक्तस्तदा देव्या देवदेवस्त्रिलोचनः।
प्रोवाचेदं महातेजा देव्याः प्रियचिकीर्षया॥ १३॥
एवं भवतु देवेशे विज्ञप्तिं सफलामिमाम्।
करिष्यामि तवेशानि पुत्रस्ते स भवेद्यथा॥ १४॥
श्रेष्ठः सर्वसुरेशानां महायोगबलान्वितः।
कृत्स्नं जगदिदं यस्य वशे स्थास्यति भामिनि॥ १५॥
गच्छत्या तत्तपः कर्तुं वरः पूर्वमपि त्वया।
प्रार्थितो ह्येष पुत्रार्थं तेनावश्यं ददानि ते॥ १६॥
एवमुक्त्वा तु तौ देवौ गिरिजाभुवनेश्वरौ।
नन्दीशेन तदा सार्धं विचरन्तौ जगद्गुरू।
सर्वोद्यानानि पश्यन्तौ विन्ध्यमाजग्मतुर्गिरिम्॥ १७॥

---

**12a** यथा मे ] यथात्म॰ R **12b** गोवृषध्वज ] मे वृषध्वजः R **12c** त्वद्वीर्य॰ ] त्वदीय॰ R **13d** देव्याः ] देव्या R **14a** देवेशे ] देवेशि R **14d** स भवेद् ] संभवेद् R **15a** श्रेष्ठः ] श्रेष्ठं R **15c** ॰दं यस्य ] ॰दन्तस्य R **15d** भामिनि ] भाविनि R **16a** गच्छत्या ] गच्छन्त्या R **16b** वरः ] वचः R **16c** ह्येष पुत्रार्थं ] श्रेष्ठपुत्रार्थे R **16d** ददानि ] ददामि R **17d** ॰द्गुरू ] ॰त् गुरुः R

---

**12a** मे ] ते **A** **12b** गोवृषध्वज ] मे वृषध्वजः **A** **12c** त्वद्वीर्यस्त्वत्प्र॰ ] $A_3A_4$, तद्वीर्यस्त्वं प्र॰ $A_7$ **12f** ॰ता मयि ] ॰तामिति **A** **13d** देव्याः ] $A_3A_7$, देव्या $A_4$ **14a** देवेशे ] देवेशि **A** **14d** स भवेद् ] $A_7$, संभवेद् $A_3A_4$ **15c** कृत्स्नं ] $A_7$, कृच्छ्रं $A_3A_4$ **15d** भामिनि ] भाविनि $A_3$, भाविनी $A_4$, भाविणि $A_7$ **16a** गच्छत्या तत् ] गच्छन्त्या तु **A** **16b** वरः ] $A_3A_4$, वर $A_7$ **16c** प्रार्थितो ] $A_3A_7$, प्रथितो $A_4$ **16d** ददानि ] $A_3A_4$, ददामि $A_7$ **17d** ॰द्गुरू ] ॰द्गुरुः **A** **17e** पश्यन्तौ ] $A_3$, पश्यन्तो $A_4A_7$ **17f** ॰र्गिरिं ] ॰र्हरिः **A**

---

**12**$(a^6)\langle a^7–c^2\rangle(c^3)\langle c^4\rangle$ $S_1$, $(c^4)$ $S_2$ **13**$\langle b^7–d^8\rightarrow\rangle$ $S_1$ (one folio lost after this)

---

**12b** ॰ध्वज ] em. Bh (silently), ॰ध्वजः $S_2S_3$ **12c** ॰द्वीर्यस्त्वत्प्र॰ ] $S_2^{ac}$ ? $S_3A_3A_4$Bh, ⏑(र्य)⏑त्प॰ $S_1$ (bottoms lost), ॰द्वीर्य⟨(स्त्व)⟩+(व)+त्प्र॰ $S_2$ **12f** ॰ता मयि ] $S_2S_3$RBh, ॰तामपि $S_1$ **13b** ॰देवस्त्रि॰ ] $S_2S_3$R**A**Bh, ॰देव तृ॰ $S_1$ **13d** देव्याः ] $A_3A_7$Bh, देव्या $S_2S_3$ **14b** विज्ञप्तिं ] $S_2^{ac}$ $S_3^{ac}$R**A**Bh, विज्ञाप्ति $S_2^{pc}S_3^{pc}$ **15a** श्रेष्ठः ] $S_2$**A**Bh, श्रेष्टः $S_3$ **15c** कृत्स्नं ] $S_2RA_7$Bh, कृत्स्न $S_3$ (unmetrical) **16a** गच्छत्या ] $S_2S_3$, गच्छन्त्या Bh • कर्तुं ] $S_2$R**A**Bh, कर्तु $S_3$ **16b** वरः ] $S_2^{pc}S_3A_3A_4$Bh, वर $S_2^{ac}$ **16c** प्रार्थितो ] $S_2RA_3A_7$Bh, प्रात्थितो $S_3$ **16d** ददानि ] $S_2S_3A_3A_4$, ददामि Bh (conj.) **17c** सार्धं ] $S_2$R**A**Bh, सार्द्धं $S_3$ **17d** ॰द्गुरू ] $S_2^{pc}$Bh, ॰द्गुरुः $S_2^{ac}S_3$ **17f** ॰जग्मतुर् ] $S_2$R**A**Bh, ॰जग्मतु $S_3$ (unmetrical)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

अथागम्य तु विन्ध्यस्य सौवर्णं शिखरोत्तमम्।
दरीकन्दरसंकीर्णं नानानिर्झरसंयुतम्।
सतडिन्मेघसंघातं घनीकृतशिलोच्चयम्॥ १८॥
नानावृक्षशिलोपेतं नानाकुसुमसंयुतम्।
नानाखगरवामोदं हेमरत्नोज्ज्वलं शुभम्॥ १९॥
मानसं तस्य मध्ये तु पुरं सृष्ट्वा महर्द्धिमत्।
मणिहेममयं दिव्यं देवासुरविमोहनम्।
परमैश्वर्यसंयुक्तौ युतौ विविशतुः पुरम्॥ २०॥
नन्दिनं च ततो देवी समाज्ञापयदव्यया।
वत्स नन्दिंस्तथा द्वारे तिष्ठेस्त्वं गणपेश्वर।
विशेन्नेह यथा कश्चित्सूक्ष्मो वायुरपि स्थितः॥ २१॥
कृत्वा शिरसि तामाज्ञां नन्दीशो गणपाधिपः।
अभवद्द्वारमूलस्थः कृत्वा तेजोऽतिदुःसहम्॥ २२॥

---

**18c** दरी° ] देवी R **19a** °शिलोपेतं ] °शतोपेतं R **19c** °खगरवा° ] °खगचरा° R **20b** सृ-ष्ट्वा ] दृष्ट्वा R **20f** युतौ ] प्रभू R **21b** °ज्ञापयद° ] °ज्ञाहूयद° R **21c** द्वारे ] भावे R **21d** तिष्ठेस्त्वं ] तिष्ठ त्वं R **21e** विशेन्नेह ] वि+(विते)+ह R **21f** °त्सूक्ष्मो ] °त्सज्ञो R **22a** शिरसि ] पिरसि R

---

**18d** °निर्झर° ] °कुसुम° $A_3A_4$, °कुशुम° $A_7$ **18e** °तडिन्मे° ] $A_3A_4$, °तभिन्मे° $A_7$ **18ef** °संघातं घनी° ] °संकाशवली° **A** **19a** नाना° ] नदी° $A_3$, नदीं $A_4$, ननौ $A_7$ • °शिलोपेतं ] °लतोपेतं $A_3$, °लतोपेतां $A_4$, °नतौपेतां $A_7$ **19b** °संयुतम् ] $A_3A_7$, °संयुतां $A_4$ **20b** सृष्ट्वा ] दृष्ट्वा **A** **20d** देवा° ] दिव्या° **A** **20e** °संयुक्तौ ] $A_3A_4$, °संयुक्तो $A_7$ **20f** युतौ ] प्रभू **A** **21a** ततो ] तदा **A** **21c** नन्दिंस्त° ] $A_7$, नंदि त° $A_3A_4$ **21d** तिष्ठेस्त्वं ] तिष्ठ{°ष्ट $A_4$} त्वं **A** • °पेश्वर ] °पेश्वरः **A** **21e–22b** ] om. $A_4$ **22b** गणपाधिपः ] यं गणेश्वरः $A_3A_7$ **22c** °मूलस्थः ] °मूलस्तु **A** **22d** ऽति° ] भि° **A**

---

**18a** °गम्य ] $S_2S_3^{pc}$R**A**Bh, °गत्य $S_3^{ac}$ **18b** सौवर्णं ] R**A**Bh, सौवर्ण्ण° $S_2S_3$ **18c** °संकीर्णं ] $S_2$R**A**Bh, °सकीर्ण्णं $S_3$ (unmetrical) **18d** °निर्झर° ] RBh (em.?), °निज्झर° $S_2S_3$ **18e** °तडि-न्मे° ] $S_2RA_3A_4$Bh, °तडित्मे° $S_3$ • °संघातं ] $S_2S_3$R, °संघात° Bh (em.) **18f** °शिलोच्चयम् ] $S_2$R**A**Bh, °शिलोचयं $S_3$ **20b** पुरं सृष्ट्वा ] conj. Bh, पुरन्दृष्ट्वा $S_2$, पुर दृष्ट्वा $S_3$ **20e** °संयुक्तौ ] $S_2RA_3A_4$Bh, °संयुक्तै $S_3$ **20f** विविशतुः ] $S_2^{pc}S_3$R**A**Bh, विविशुतुः $S_2^{ac}$ **21c** नन्दिंस्त° ] $RA_7$Bh (em.?), नन्दि त° $S_2S_3$ **21d** °पेश्वर ] $S_2^{pc}$RBh, °पेश्वरम् $S_2^{ac}$, °पेश्वरं $S_3$ **21e** विशेन्ने° ] $A_3A_7$Bh, विसेन्ने° $S_2$, विशे ने° $S_3$ • यथा ] $RA_3A_7$, तथा $S_2S_3$, वथा Bh (typo) **22a** °माज्ञां ] $S_2RA_3A_7$Bh, °माज्ञं $S_3$ **22b** गणपाधिपः ] $S_2$RBh, म गणाधिपः $S_3$ **22c** अभवद्द्वा° ] R**A**Bh, भगव द्वा° $S_2^{ac}S_3$, भगवां द्वा° $S_2^{pc}$ • °मूलस्थः ] RBh (em.), °मूलस्थ $S_2^{ac}S_3$, °मूलस्थं $S_2^{pc}$ **22d** °दुःसहम् ] $S_2$R**A**Bh, °दुसहं $S_3$ (unmetrical)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

योगयुक्तौ तदा देवौ परां मूर्तिं समास्थितौ।
कृत्स्नस्य जगतो योनी पार्वतीभुवनेश्वरौ।
तस्थतुः सुचिरं कालं तनयार्थं महाद्युती॥ २३॥
स न शक्यो मया वक्तुं ब्रह्मणा वा महामुने।
संयोगो यो भवेद्देव्या देवदेवस्य शूलिनः।
ब्रह्मणो मद्विधानां च स्रष्टासौ परमेश्वरः॥ २४॥
अवश्यं त्वागमे वाच्यं यथावृत्तं मया श्रुतम्।
अतो वक्ष्यामि ते व्यास प्रियः शिष्यश्च मे भवान्॥ २५॥
योगसंधानमास्थाय तयोरेव महामुने।
अतीतं स्थितयोर्दिव्यं सहस्रं शरदामभूत्॥ २६॥
ततो ऽभवन्निमित्तानि घोराणि त्रासनानि च।
चचाल पृथिवी कृत्स्ना सशैलवनकानना॥ २७॥
नद्यः शोषं तदा जग्मुश्चुक्षुभे सरितां पतिः।
तपनो निष्प्रभश्चासीद्ववावुष्णं समीरणः।
पेतुरुल्का महाघोरा दिक्प्रदाहश्च दारुणः॥ २८॥

---

**23a** तदा ] ततो R **23b** परां मूर्तिं समा° ] परमां मूर्त्तिमा° R **23d** °नेश्वरौ ] °नेश्वरी R **24a** शक्यो ] कान R **24f** स्रष्टासौ ] दृष्टा च R **25b** मया ] यथा° R **25d** प्रियः ] प्रिय° R **26c** स्थितयोर् ] स्थितये R **26d** °मभूत् ] °मभृत् R **28c** निष्प्रभ° ] निष्प्रभा° R **28d** °द्ववावुष्णं ] °द्ववौ चोग्रः R **28ef** ] पेतुरुक्षावसंख्याताः पृथुलाश्च सुदारुणाः R

---

**23b** परां ] $A_3A_7$, परा $A_4$ **23c** योनी ] योगी **A** **23e** तस्थतुः ] $A_3A_4$, तत्तस्थु $A_7$ **23f** °यार्थं महा° ] °यानुमित° **A** • °द्युती ] $A_3^{pc}A_4^{pc}A_7$, °द्युति $A_3^{ac}A_4^{ac}$ **24a** स न ] न च **A** **24c** संयोगो यो ] संयोग सं° $A_3A_4$, संयोगास्वं $A_7$ **24f** स्रष्टासौ ] $A_3$, सृष्टासौ $A_7$, सृष्टा सो $A_4$ **25a** त्वागमे ] त्वयि{°पि $A_4$} मे **A** **25b** मया ] यथा° **A** **25c** अतो ] ततो **A** **25d** प्रियः ] प्रिय° **A** **26b** महामुने ] $A_4$, महात्मने $A_3$, महामने $A_7$ **26c** अतीतं ] अभीतं **A** **26d** सहस्रं शरदा° ] सहश्रं सरदा° $A_7$, सहस्रवरदा° $A_4$, सरदा° $A_3$ (unmetrical) **27b** त्रासनानि ] विविधानि **A** **28d** °द्ववावुष्णं ] °त् ववौ{°रौ $A_4$} चोष्णं **A** • समीरणः ] $A_3$, समीरिणः $A_7$, समीणिणः $A_4$ **28e** °रुल्का ] °रुद्धा $A_3A_4$, °रद्धा $A_7$ **28f** दिक्प्रदाहश्च दारुणः ] दिग्दाहश्च तदाभवत् $A_3A_4$, दिगदाहश्च दानवः $A_7$

---

**28**($f^2$, $f^4$, $f^8$) $S_2$

---

**23a** योगयुक्तौ ] **RA**, योगयुक्तो $S_2S_3$, यौगयुक्तौ Bh (typo) • देवौ ] **RA**Bh, देवो $S_2S_3$ **23b** परां मूर्तिं ] $A_3A_7$Bh, पराम्मूर्त्तिं $S_2$, परा मूर्त्ति $S_3$ **23e** तस्थतुः ] $S_2$**R**$A_3A_4$Bh, तस्थतु $S_3$ (unmetrical) **23f** °द्युती ] $S_2^{pc}S_3$**R**$A_3^{pc}A_4^{pc}A_7$Bh, °द्युतिम् $S_2^{ac}$ **24a** शक्यो ] **A**Bh, सह्यो $S_2S_3$ **24c** संयोगो ] $S_3$**R**, स योगो $S_2$, सुयोगो Bh (conj.?) • भवेद् ] $S_2$**RA**, भवे $S_3$, भवद् Bh (conj.) **24f** स्रष्टासौ ] $S_2S_3A_3$, श्रेष्ठोसौ Bh (conj.?) **25b** मया ] $S_2S_3$, यथा° Bh **25c** ते व्यास ] $S_2^{pc}$**RA**Bh, देव्या स $S_2^{ac}S_3$ **26a** °संधान° ] $S_2S_3^{ac}$**RA**Bh, °सत्वान° $S_3^{pc}$ **26b** °रेव ] $S_3$**RA**, °रेवम् $S_2$, °रेवं Bh **26c** स्थितयोर् ] $S_2$**A**Bh, स्थितयो $S_3$ **26d** सहस्रं ] $S_2$**R**Bh, सहस्र $S_3$ • °दामभूत् ] $S_2^{pc}$**A**Bh, °दां भूत् $S_2^{ac}$ (unmetrical), °दावभूत् $S_3$ **27a** ऽभवन्नि° ] $S_2$**RA** Bh, भवन्ति नि° $S_3$ (unmetrical) **27d** सशैल° ] $S_2S_3^{pc}$**RA**Bh, सशैले $S_3^{ac}$ **28d** °वुष्णं ] $S_2S_3$, °वुष्णः Bh (em.) **28f** दिक्प्रदाहश्च ] $S_3$, दि(क्प्र)दा(हा)श्च $S_2^{pc}$, दि(क्षु) दा(ह)श्च $S_2^{ac}$, दिशश्चासन्सु° Bh (conj.?, in a note Bh suggests दिशश्चासंस्त°) • दारुणः ] $S_2S_3$, °दारुणाः Bh (conj.?)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

एवमुत्पातवित्रस्ता शुभहेतोर्वसुंधरा।
जगाम शरणं विष्णुं गत्वा चार्तिं निवेदयेत्॥ २९॥
उत्पाता दारुणा देव बभूवुर्बहवो भृशम्।
तेनातीव समुद्विग्ना त्वामद्य शरणं गता॥ ३०॥
अथ विष्णुः सुरान्सर्वानिदमश्रावयत्प्रभुः।
ततो दिवौकसः सर्वे बृहस्पतिपुरोगमाः।
एकत्र संगता भूत्वा चक्रुर्बहुविधाः कथाः॥ ३१॥
महाबुद्धिरथाहेदं वाक्यमङ्गिरसः सुतः।
श्रीकण्ठो भगवानेष देवदेवस्त्रिलोचनः।
युक्तो ऽभूद्धिमवत्पुत्र्या तनयार्थं महाद्युतिः॥ ३२॥
दिव्यं वर्षसहस्रं तु योगेन परमेष्ठिनः।
अगाद्युक्तस्य पार्वत्या बभूवुर्दारुणास्ततः।
उत्पाता जगतस्त्रासाश्चिन्त्यते किमिहापरम्॥ ३३॥
गच्छाम सहिताः सर्वे स्तोतुं भक्त्या वृषध्वजम्।
यथा न देहजः पुत्रो भवेद्देव्याः सुरेश्वराः।
विज्ञापयाम देवेशं तथा शीघ्रमिहामराः॥ ३४॥

---

**29b** °सुंधरा ] $R^{pc}$, °सुन्धराः $R^{ac}$ **30cd** तेनातीव समुद्विग्ना त्वा° ] देवताश्च समुद्विग्नास्त्वा° R **30d** °णं गता ] °णङ्गताः R **31b** °श्रावयत्प्रभुः ] °प्रावयद्विभुः R **31f** °र्बहुविधाः ] °र्विस्तरतः R **32ab** °रथाहेदं वाक्य° ] °रथादेहं वाह्य° R **32f** तनयार्थं महा° ] चलयाव मही° R **33b** योगेन ] योगे च R **33c** अगाद्युक्तस्य ] अवियुक्तश्च R **33d** °वुर्दारुणास्ततः ] °वु+ः सर्वदेवताः+ R **33ef** °स्त्रासाश्चिन्त्यते ] °स्तत्र याचिन्मां R **34a** गच्छाम ] गच्छामः R **34b** भक्त्या ] शक्या R **34d** °द्देव्याः ] °द्व्यास R

---

**29b** °हेतोर् ] $A_3A_7$, °हेतो $A_4$ • °सुंधरा ] $A_3A_4$, °सुन्धराः $A_7$ **29d** चार्तिं ] $A_3$, चार्त्ति $A_4A_7$ • निवेदयेत् ] न्यवेदयत् $A_3A_4$, न्यवेशयत् $A_7$ **30cd** तेनातीव समुद्विग्ना त्वा° ] देवताप्यतिसंविग्ना{°ग्रा° $A_7$}स्त्वा° **A** **30d** गता ] गताः **A** **31c** दिवौकसः ] $A_3A_4$, दिवौकशः $A_7$ **32e–33f** ] om. **A** **34a** गच्छाम ] $A_7$, गच्छामः $A_3A_4$ **34d** °द्देव्याः ] $A_3A_4$, °द्देव्या $A_7$ **34e** °ज्ञापयाम ] °ज्ञापयात **A**

---

**29b** °हेतोर् ] $S_2RA_3A_7Bh$, °हेतो $S_3$ • °सुंधरा ] $S_2^{pc}R^{pc}A_3A_4Bh$, °सुन्धराः $S_2^{ac}S_3$ **29d** चार्तिं नि° ] $S_2^{pc}S_3^{pc}R$, चार्त्त(स्थं) $S_2^{ac}$, चार्त्ति नि° $S_3^{ac}$, चार्तिं न्य° Bh • °वेदयेत् ] $S_2S_3R$, °वेदयत् Bh **30d** शरणं ] $S_2R$**A**Bh, शरण $S_3$ (unmetrical) • गता ] $S_2^{pc}S_3Bh$, गताः $S_2^{ac}$ **31a** विष्णुः ] $S_2^{pc}R$**A**Bh, विष्णु $S_2^{ac}S_3$ • सुरान् ] $S_2R$**A**Bh, सुरा $S_3$ **31c** दिवौकसः ] $S_2RA_3A_4Bh$, दिवौकस $S_3$ (unmetrical) **32c** श्रीकण्ठो ] $S_2R$**A**Bh, श्रीकण्डो $S_3$ **32f** °द्युतिः ] $S_2RBh$, °द्युति $S_3$ **33a** दिव्यं ] $S_2RBh$, दिव्य° $S_3$ • °सहस्रं तु ] $S_2RBh$, °सहस्रेण $S_3$ **33b** योगेन ] $S_2Bh$, योगेण $S_3$ **33c** अगाद् ] $S_3Bh$ (em.), आगाद् $S_2$ **33d** बभूवुर् ] $S_2Bh$, बभूवु $S_3$ (unmetrical) **33ef** °स्त्रासाश्चि° ] em. Bh (silently), °स्त्रासा चि° $S_2S_3$ **34a** सहिताः ] R**A**Bh, सहिता $S_2S_3$ **34c** न ] $S_2S_3R$**A**, च Bh (conj.?) **34d** भवेद्देव्याः ] $A_3A_4Bh$, भवद्देव्या $S_2$, भवन्देव्या $S_3$ **34e** देवेशं ] $S_2R$**A**Bh, देवेश $S_3$ **34f** °हामराः ] $S_2^{pc}S_3R$**A**Bh, °हामरा $S_2^{ac}$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

ततो वैवस्वतः प्राह वचः क्रोधविनिःसृतम्।
किमर्थं भृशमुद्विग्ना भवन्तः सर्व एव हि॥ ३५॥
यद्यसौ देवदेवस्य तनयो ऽस्मासु भक्तिमान्।
उत्पत्स्यति न च द्रोग्धा ततः क्षंस्याम तं सुराः॥ ३६॥
अथ चेत्कर्कशो ऽस्मासु द्रोग्धा वा स भविष्यति।
तत एनमहं बद्धा कालपाशेन बालकम्।
नयिष्ये स्ववशं क्रूरं मृत्युना सहितो ऽमराः॥ ३७॥
न चेत्पुरंदरो वज्रं तस्य क्षेप्स्यति मूर्धनि।
द्विधा येन कृतो मूढः प्राणांस्त्यक्ष्यति दुस्त्यजान्॥ ३८॥
ब्रुवतस्तस्य बह्वेवं क्रोधसंरक्तलोचनः।
विष्णुः प्रोवाच धर्मात्मा वचांसि परमार्थवित्॥ ३९॥
अहो त्वया सुविश्रब्धं प्रोच्यते भास्करात्मज।
परमार्थमविज्ञाय क्रोधस्य वशवर्तिना॥ ४०॥
तनयः किल यः शम्भोर्गिरिजायां भविष्यति।
स मूढ इव यः कश्चिद्भविता वशगस्तव॥ ४१॥

---

**36b** ऽस्मासु भक्ति° ] स्मानभुक्ति° R **36cd** ] उत्पत्स्यते स च ⟨⏓⟩यदा तदा +सर्व+म तं सुराः R (यदा retraced) **37a** °त्कर्कशो ] °त् कर्कसो R **37b** द्रोग्धा वा ] बालके R **37d** °पाशेन ] $R^{pc}$ ?, °पाशैर्न $R^{ac}$ **37e** नयिष्ये स्ववशं ] नयिस्ये स्ववसं R **38ab** °रो वज्रं तस्य ] °रस्तस्य वज्रं R **39a** बह्वेवं ] बह्वर्थं R **39d** वचांसि ] व(र्य)सि $R^{pc}$ (unmetrical), वरोसि $R^{ac}$ **40a** त्वया सु° ] त्वयाथ R **41a** शम्भोर् ] शम्भो R **41d** वशगस्तव ] वसगस्तदा R

---

**35b** °निःसृतम् ] °निःसृतः $A_3A_7$, °निसृजः $A_4$ (unmetrical) **36a** देवदेवस्य ] $A_3A_4$, देवस्य $A_7$ (unmetrical) **36c** उत्पत्स्यति ] उत्पद्यते $A_3$, उत्पद्यन्ते $A_4A_7$ • द्रोग्धा ] द्रोहेत् $A_3A_4$, द्रोहे $A_7$ **36d** क्षंस्याम ] क्षम्याम **A** **37a** ऽस्मासु ] $A_7$, युष्मान् $A_3$, युष्मात् $A_4$ **37b** द्रोग्धा वा स ] पीडको वा **A** **37c–38b** ] om. **A** **38c** कृतो ] कृते **A** **39d** °मार्थवित् ] °मार्थवत् **A** **40a** °विश्रब्धं ] °विस्नब्धं $A_3A_4$, °विस्नब्धं $A_7$ **40b** °रात्मज ] $A_3^{pc}A_7$, °रात्मजः $A_3^{ac}A_4$ **40d** वशवर्तिना ] वर्त्तिना $A_7$ (unmetrical), वशवर्त्तिनः $A_4$, चशवर्जिनः $A_3$ **41a** यः शम्भोर् ] शम्भोर्यो $A_3A_7$, शंभोजोर् $A_4$ **41d** वशग° ] $A_3$, वसग° $A_4A_7$

---

**36**⟨d¹–d²⟩(d³)⟨d⁴⟩(d⁵–d⁷) $S_3$

---

**35b** क्रोधवि° ] $S_3^{pc}$R**A**, क्रोध(नि°) $S_2^{ac}S_3^{ac}$, क्रोधाभि° $S_2^{pc}$Bh (em.?, Bh reads क्रोधभि° in $S_2$ and suggests क्रोधविमिश्रितं in a note) • °निःसृतम् ] RBh (em.?), °निसृतः $S_2S_3$ (unmetrical) **35c** किमर्थं ] $S_2$R**A**Bh, किमर्थ $S_3$ **35d** भवन्तः ] $S_2$R**A**Bh, भवन्त $S_3$ (unmetrical) • हि ] $S_2^{pc}$R**A**Bh, हिः $S_2^{ac}S_3$ **36c** द्रोग्धा ] conj. Bh (silently), द्रोश्वा $S_2S_3$ **37a** °त्कर्कशो ] $S_2$**A**Bh, °त्कक्कशो $S_3$ **37e** नयिष्ये ] $S_2S_3$, आनेष्ये Bh (conj.) • क्रूरं ] RBh (em.?), कूरं $S_2S_3$ **38c** मूढः ] $S_2^{pc}$R**A**Bh, मूढ $S_2^{ac}$, मूढा $S_3$ **38d** प्राणांस्त्य° ] $S_2$R**A**Bh, प्राणंस्त्य° $S_3$ • दुस्त्यजान् ] R**A**Bh, दुस्त्यजाम् $S_2$, दुस्त्यजं $S_3$ **39a** ब्रुवतस्त° ] $S_2^{pc}S_3$R**A**Bh, ब्रुव(ह्म)स्त $S_2^{ac}$ **39c** विष्णुः ] $S_2^{pc}$R**A**Bh, विष्णु $S_2^{ac}S_3$ **39d** वचांसि ] $S_2$**A**Bh, वचासि $S_3$ **40b** °रात्मज ] $S_2^{pc}$R$A_3^{pc}A_7$Bh, °रात्मजः $S_2^{ac}S_3$ **41a** तनयः किल यः ] $S_2^{pc}S_3$RBh, तनय $S_2^{ac}$ (unmetrical) • शम्भोर् ] $S_2$Bh, शम्भो $S_3$ **41d** वशग° ] $S_2A_3$Bh, वशश° $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

किमसौ मानवो ऽन्यो वा जरामृत्युसमन्वितः।
उत्पत्स्यति रवेः पुत्र तेन स्याद्वशगस्तव॥ ४२॥
कालेनापरिपूर्णेन मानवस्यापि भानुज।
न त्वं वशयिता नाम किमु पुत्रस्य शूलिनः॥ ४३॥
तेजो भगवतः शम्भोर्यद्भविष्यत्युत्तमम्।
स कथं वध्यतां यायात्तव शक्रस्य वा विभो॥ ४४॥
ब्रवीमि वो हितं देवाः क्रियते यदि मद्वचः।
प्रयाम सहिताः सर्वे तं प्रसादयितुं हरम्॥ ४५॥
यो नः स्वयंवरे दत्तो वरस्तिष्ठति शंकरे।
तमेव वरयिष्यामो वरमग्र्यं पिनाकिनम्।
यथा न देहजो देव्यास्तनयः संभविष्यति॥ ४६॥
नास्माकमहितं शम्भुः पुत्रमुत्पादयिष्यति।
वयमेव सुताः सर्वे शंकरस्याग्रजा विभोः॥ ४७॥

---

**42cd** पुत्र तेन ] पुत्रस्तेन R **42d** °द्वशग° ] °द्वसग° R **43b** मानव° ] मानस° R • भानुज ] भानुजे R **43c** वशयिता ] वशेपिता R **44cd** यायात्तव ] यातस्तव R **44d** वा विभो ] धीमतः R **45d** हरं ] वरं R **46a** स्वयंवरे ] स्वयम्वरो R **46c** वरयिष्यामो ] मृगयिष्यामो R **46f** संभविष्यति ] $R^{pc}$, संभवति $R^{ac}$ (unmetrical) **47d** °स्याग्रजा ] °स्याग्रजो R

---

**42c** पुत्र ] $A_3A_7$, पुत्रा $A_4$ **42d** तेन ] किं तत् $A_3$, किं त $A_4A_7$ • °द्वशग° ] $A_3A_4^{pc}$, °द्वसग° $A_4^{ac}A_7$ • °स्तव ] $A_3A_7$, °स्त्यव $A_4$ **43a** कालेना° ] $A_7$, कालेन $A_3$, कालेव $A_4$ • °पूर्णेन ] °पूतेव $A_3A_4$, °भूतस्य $A_7$ **43b** मानव° ] $A_3A_4$, मानुज° $A_7$ **43c** वशयिता नाम ] नाशयिता राजन् **A** **44a** तेजो ] ततो **A** **44c** यायात् ] $A_3$, जायात् $A_4A_7$ **45b** क्रियते ] क्रियतां $A_3A_7$, क्रीयतां $A_4$ • यदि मद्वचः ] तदिदं वचः $A_3A_4$, तदिमम्वचः $A_7$ **45c** प्रयाम ] प्रयामः **A** **45d–47c** ] om. **A** **47d** °स्याग्रजा ] °स्याग्रतो **A**

---

**43**$(b^8–c^4)\langle c^5–d^8\rightarrow\rangle$ $S_1$ **44**$\langle\leftarrow a^1–a^3\rangle(a^4, d^4)$ $S_1$ **45**$(a^6)\langle a^7–a^8\rangle$ $S_1$ **46**$(a^8)\langle e^7\rangle(e^8–f^1)\langle f^2\rangle$ $S_1$, $(e^7)$ $S_2$ **47**$(c^3)\langle d^8\rangle$$S_1$

---

**42a** ऽन्यो ] $S_1^{pc}S_2S_3$R**A**Bh, भ्यो $S_1^{ac}$ **42b** जरा° ] $S_1^{pc}S_2S_3$R**A**, ज(ला°) $S_1^{ac}$, जन्म° Bh (conj.?) • °समन्वितः ] $S_1S_3$R**A**Bh, °समन्विताः $S_2$ **42c** उत्पत्स्यति ] $S_2S_3$R**A**Bh, उत्पस्येति $S_1$ • रवेः ] $S_1S_2$R**A**Bh, रवे $S_3$ **42cd** पुत्र तेन ] $S_1S_2^{pc}S_3$, पुत्रं तेन $S_2^{ac}$, पुत्र येन Bh (conj.) **42d** °स्तव ] $S_2S_3$R$A_3A_7$Bh, °स्तवः $S_1$ **43a** कालेना° ] $S_2S_3$R$A_7$Bh, कालेनो $S_1$ **43b** भानुज ] $S_2^{pc}$**A**Bh, भान(जः) $S_1$, भानुजः $S_2^{ac}S_3$ **43c** न ] $S_1S_2^{pc}S_3$R**A**Bh, (स) $S_2^{ac}$ • वशयिता ] $S_2S_3$, (वश)··· $S_1$, नाशयिता Bh (in a note Bh suggests वशमिता, possibly typo of वशयिता) **44a** तेजो ] $S_2$RBh, तेज $S_3$ (unmetrical) **44c** कथं ] $S_1$R**A**Bh, कथ्यं $S_2S_3$ • वध्यतां ] $S_2$R**A**Bh, वध्यता $S_1S_3$ **44cd** यायात्तव ] $S_3A_3$Bh, याया तव $S_1$, यात+ः त+व $S_2$ **44d** वा विभो ] $S_2S_3$**A**Bh, वा विभोः $S_1^{pc}$ ?, चाविभोः $S_1^{ac}$ ? **45a** °तं देवाः ] $S_2^{pc}$R**A**Bh, (त) – ⏑̱ $S_1$ (anusvāra possibly lost), °तन्देवा $S_2^{ac}S_3$ **45b** मद्वचः ] $S_2$RBh, मद्वच $S_1S_3$ **45c** सहिताः ] $S_2$R**A**Bh, सहिता $S_1S_3$ **45d** °सादयितुं ] $S_1S_2$RBh, °सादयितु $S_3$ (unmetrical) **46a** यो ] $S_2S_3$RBh, ये $S_1^{ac}$, मे $S_1^{pc}$ **46c** वरयिष्यामो ] $S_1$Bh, मृगशिष्यामो $S_2$, मृगयिष्यामो $S_3$ **46d** पिनाकिनम् ] $S_1$RBh, पिनाकिनः $S_2S_3$ **47a** नास्माकम° ] $S_2S_3$RBh, नास्मादम° $S_1$ • शम्भुः ] $S_2S_3$RBh, शम्भु $S_1$ **47c** सुताः ] $S_2$RBh, सुता $S_1S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

न शक्यस्तपसा द्रष्टुं न ज्ञानेन सुरेश्वरः ।
भक्त्या परमया द्रष्टुं शक्यः स्यात्स वृषध्वजः ॥ ४८ ॥
आगच्छध्वं गमिष्यामो यत्र तिष्ठति शंकरः ।
परां भक्तिं समास्थाय यथा पश्येम शंकरम् ॥ ४९ ॥
हुतभुक्चैष नो देवस्तत्सकाशं प्रवेक्ष्यति ।
सर्वेषामेव विज्ञप्त्या सुराणां सुरसत्तमः ॥ ५० ॥
इति श्रुत्वा वचस्तस्य विष्णोरमिततेजसः ।
बृहस्पतिपुरोगास्ते हृष्टात्मानो दिवौकसः ।
साधु साध्विति संतुष्टा वचांस्यूचुः सुरोत्तमाः ॥ ५१ ॥
ततो विष्णुसहायास्ते गत्वा ते शृङ्गमुत्तमम् ।
ऊचुर्हुताशनं देवं वचः स्तुतिपुरःसरम् ॥ ५२ ॥
त्वमग्ने सर्वदेवानां हितकृत्सर्वतो ऽव्ययः ।
प्रविश्य त्राहि नः सर्वाञ्छंकराय निवेदय ॥ ५३ ॥

---

**48a** न शक्यस्त॰ ] नासक्तस्त॰ R **49c** परां ] परा R **49d** पश्येम ] पश्यामि R **50a** हुतभुक्चैष नो ] +मुखं+ मो हुतभुग् R **50c** विज्ञप्त्या ] विज्ञप्तो R **52b** ते शृङ्ग॰ ] तच्छृङ्ग॰ R **53a** ॰मग्ने ] ॰मग्रे R **53b** ऽव्ययः ] ऽव्यय R

---

**48a** शक्यस्त॰ ] शक्यं त॰ **A** • द्रष्टुं ] $A_3$, दृष्टुं $A_4A_7$ **48b** सुरेश्वरः ] $A_3A_7$, सुरेश्वराः $A_4$ **48c** द्रष्टुं ] $A_3$, दृष्टुं $A_4$, युक्तं $A_7$ **48d** शक्यः स्यात्स ] शक्यं स्याद्गो॰ **A** **50a** नो ] णो **A** **50b** ॰स्तत्स॰ ] $A_3A_7$, ॰स्त्वत्स॰ $A_4$ **50c** विज्ञप्त्या ] विज्ञप्ता **A** **50d** ॰सत्तमः ] ॰सत्तमाः **A** **51e** संतुष्टा ] संहृष्टा **A** **51f** वचांस्यूचुः ] $A_3$, वचांस्योचुः $A_4A_7$ • सुरोत्तमाः ] $A_3A_7$, सुरोत्तमा $A_4$ **52b** ॰मुत्तमम् ] ॰मुच्छ्रितं **A** **53a** ॰देवानां ] $A_3A_4$, ॰भूतानां $A_7$ **53d** निवेदय ] न्यवेदयत् **A**

---

**48**$(d^6)$ $S_1$, $(a^3)$ $S_2$ **51**$\langle b^1\rangle(e^5)$ $S_1$ **53**$(c^2, d^5)\langle d^6–d^8\rangle$ $S_1$

---

**48a** शक्यस्त॰ ] $S_1^{ac}$ ?Bh, शक्तस्त॰ $S_1^{pc}$, श(क्त्य)न्त॰ $S_2$, शक्यं त॰ $S_3$ **48b** ज्ञानेन ] $S_2S_3$RABh, ज्ञायेत $S_1$ • सुरेश्वरः ] $S_1RA_3A_7$, सुरेश्वराः $S_2S_3$Bh **48d** शक्यः ] $S_2S_3$RBh, शक्र $S_1$ • स्यात्स वृष॰ ] $S_2$RBh, स्या वृष(भ॰) $S_1$, स्यात्स वृश॰ $S_3$ **49a** गमिष्यामो ] $S_2S_3$RABh, करिष्यामो $S_1$ **49c** भक्तिं ] $S_1S_2$RABh, भक्ति $S_3$ **49d** पश्येम ] $S_1S_2S_3$**A**, पश्येय Bh (typo?) **50a** ॰भुक्चैष ] **A**, ॰भुश्चैष $S_1$, ॰भुक्चैम $S_2$, ॰भुक्चैप $S_3$, ॰भुक् चैव Bh (em.?) **50ab** ॰वस्तत्स॰ ] $RA_3A_7$Bh, ॰व तत्स॰ $S_1$, ॰वस्तम्भ॰ $S_2S_3$ **50c** विज्ञप्त्या ] $S_2S_3$Bh, विज्ञाप्य $S_1$ **50d** सुराणां ] $S_2S_3$RABh, सुराणा $S_1$ • ॰सत्तमः ] $S_1S_2^{ac}S_3$R, ॰सत्तमाः $S_2^{pc}$Bh **51e** हृष्टात्मानो ] $S_1S_2S_3^{pc}$RABh, हृष्टत्मा-नो $S_3^{ac}$ **51f** वचांस्यूचुः ] $S_1S_2RA_3$Bh, वचांसूचु $S_3$ • सुरोत्तमाः ] $S_1S_2^{pc}RA_3A_7$Bh, सुरोत्तमः $S_2^{ac}S_3^{pc}$, सुरोत्ततः $S_3^{ac}$ **52a** विष्णुस॰ ] $S_1S_3$RABh, विष्णुस्स॰ $S_2$ • ॰हायास्ते ] $S_2^{pc}S_3$RABh, ॰हायास्त्रे $S_1$, ॰हास्ते $S_2^{ac}$ (unmetrical) **52b** ते शृङ्ग॰ ] $S_1S_2S_3$**A**, तच्छृंग॰ Bh (conj.?) • ॰मुत्तमम् ] $S_1$RBh, ॰मुच्छ्रितम् $S_2$, ॰मुच्छ्रितं $S_3$ **52c** ऊचुर् ] $S_1S_2$RABh, ऊचु $S_3$ (unmetrical) **52d** ॰पुरःसरम् ] $S_1S_2$RABh, ॰पुरसरं $S_3$ (unmetrical) **53a** ॰मग्ने स॰ ] $S_1S_2^{ac}S_3$**A**Bh, ॰मग्ने-स्स॰ $S_2^{pc}$ **53c** प्रविश्य ] $S_2S_3$RABh, प्र(वि)श्या $S_1$ • नः ] $S_1S_2$RABh, न $S_3$ (unmetrical) **53cd** ॰र्वाञ्छंकराय ] $S_1$RABh, ॰र्वान्छङ्कराय $S_2$, ॰र्वान्सङ्कराय $S_3$ **53d** निवेदय ] RBh, (नि)–⏑⏓ $S_1$, न्यवेदयत् $S_2^{pc}$, व्यवेदयत् $S_2^{ac}S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

तथा कुर्यात्सुरश्रेष्ठ येन निर्गम्य शंकरः।
अस्मान्निरीक्षते देवः प्रह्वान्भक्तिमतः स्थितान्॥ ५४॥
इत्युक्तः स सुरैः सर्वैः प्रत्युवाच हुताशनः।
अकर्तव्यं हि मे देवा न युष्मान्प्रति विद्यते॥ ५५॥
पार्वत्या सह संयुक्तं देवदेवेश्वरं परम्।
न मे शक्तिर्हरं द्रष्टुं भवन्तश्चाकुला भृशम्।
युष्मद्वाक्यमलङ्घ्यं च कृच्छ्रमेतदतीव मे॥ ५६॥
प्रवेक्ष्ये सुतपं देवाः करिष्ये साहसं महत्।
इत्युक्त्वा स जगामाशु भवनं तत्कपर्दिनः॥ ५७॥
तत्रापश्यत्स्थितं द्वारे नन्दिनं परमौजसम्।
द्वारमाक्रम्य तिष्ठन्तं दीप्तपट्टसधारिणम्॥ ५८॥

---

**54a** कुर्यात् ] कुरु R **54b** निर्गम्य ] (तु)ष्यति $R^{pc}$, (स) $R^{ac}$ (unmetrical) **54c** अस्मान्निरीक्षते ] अस्या निरीक्ष्यते R **54d** प्रह्वान् ] प्रशान् R **55d** विद्यते ] ॰पद्यते R **56b** देवदेवेश्वरं परं ] देव-देवं सुरेश्वरं R **56e** ॰मलङ्घ्यं च ] ॰मलं +सर्व्वं+ R **57a** सुतपं ] +हुत+वान् R **57c** स जगामाशु ] साजगामाथ R **57d** भवनं ] भ+ग+वन् R **58a** ॰पश्यत् ] ॰गम्य R **58d** ॰पट्टस॰ ] ॰पट्टिश॰ R

---

**54a** ॰श्रेष्ठ ] $A_4A_7$, ॰श्रेष्ट $A_3$ **54d** प्रह्वान् ] इष्टान् **A** **55d** न युष्मान्प्रति ] युष्मान् प्रति न **A** **56b** देवदेवेश्वरं परं ] देवदेवं सुरेश्वरं $A_3$, देवदेवेश्वरेश्वरं $A_4A_7$ **56c** द्रष्टुं ] $A_4$, इंष्टुं $A_3$, देवं $A_7$ **56d** ॰श्चाकुला ] $A_7$, ॰श्चाद्दना $A_3A_4$ **56e** युष्मद्वा॰ ] $A_4A_7$, युष्माद्वा॰ $A_3$ • ॰लङ्घ्यं च ] $A_4$, ॰लंघ्या च $A_3$, ॰लङ्घ्यश्च $A_7$ **56f** कृच्छ्र॰ ] कृत्च्छ्र॰ $A_7$, कृत॰ $A_3A_4$ **57a** प्रवेक्ष्ये सुतपं ] प्रवेक्ष्ये स्वव-रान्{॰रा $A_4$} $A_3A_4$, दिशन्तु मे वरान् $A_7$ **57c** इत्युक्त्वा स ] $A_3A_4$, इत्युक्ता सा $A_7$ • ॰माशु ] $A_7$, ॰मासु $A_3A_4$ **58d** ॰पट्टस॰ ] ॰पट्टिश॰ **A**

---

**56**⟨d²⟩(d⁴)⟨e³–e⁶⟩ $S_1$

---

**54a** कुर्यात्सुर॰ ] $S_1S_2^{pc}$**A**, कुर्यात्सुरः $S_2^{ac}S_3$, कुर्यास्सुर॰ Bh (em.) • ॰श्रेष्ठ ] $S_1S_2RA_4A_7Bh$, श्रेष्ट $S_3$ **54c** अस्मान्नि॰ ] **A**Bh, अस्यां नि॰ $S_1$, अस्मन्नि॰ $S_2^{pc}$, अस्मिन्नि॰ $S_2^{ac}S_3^{pc}$, अस्मि नि॰ $S_3^{ac}$ **54d** प्रह्वान् ] $S_1S_2Bh$ (प्रह्वां in $S_1S_2$), प्रह्वा $S_3$ • स्थितान् ] R**A**Bh, स्थिताम् $S_1S_2^{pc}$, स्थितम् $S_2^{ac}S_3$ **55a** इत्युक्तः ] $S_1S_2$R**A**Bh, इत्युक्त $S_3$ • सुरैः सर्वैः ] $S_2$R**A**Bh, सुरैः सर्व्वै $S_1$, सुरै सर्वैः $S_3$ **55b** हुताशनः ] $S_2S_3$R**A**Bh, हुताशनं $S_1$ **55d** विद्यते ] $S_2S_3$**A**Bh, वद्यते $S_1$ **56a** संयुक्तं ] $S_1S_3$R**A**Bh, संयुक्तां $S_2$ **56b** देवदेवेश्वरं परम् ] $S_1$Bh, देवन्देवेश्वरम्प{॰म्पं॰ $S_2^{ac}$}रम् $S_2$, देवदेवश्वर परं $S_3$ (unmetrical) **56c** शक्तिर् ] $S_1S_2^{pc}$R**A**Bh, शक्ति $S_2^{ac}S_3$ • द्रष्टुं ] $S_1S_2RA_4Bh$, द्रष्टु $S_3$ **56e** युष्मद्वा॰ ] $S_2RA_4A_7Bh$, युष्म⏑̱ $S_1$, युष्माद्वा॰ $S_3$ • ॰लङ्घ्यं च ] $S_2S_3A_4Bh$, –घ्यञ्च $S_1$ **56f** मे ] $S_2S_3$R**A**Bh, मोः $S_1$ **57a** प्रवेक्ष्ये ] $S_2S_3RA_3A_4Bh$, प्रवेक्षे $S_1$ • सुतपं देवाः ] conj., षुतवे देवा $S_1$, सुतवन्देवाः $S_2$, सुतवन्देवा $S_3$, दूतवद्देवाः Bh (conj.) **57b** महत् ] $S_1S_2$R**A**Bh, महतं $S_3$ (unmetrical) **57c** इत्युक्त्वा ] $S_1S_2RA_3A_4Bh$, इत्यात्का $S_3$ • ॰माशु ] $S_1S_3A_7Bh$, ॰माशुर् $S_2$ **57d** ॰वनं तत्कपर्दिनः ] **A**Bh, ॰वन्तत्कर्म्मभिर्द्दिनः $S_1$, ॰वनन्तं कपर्द्दिनः $S_2$, ॰वनन्तं कपर्दि-नः $S_3$ **58a** ॰पश्यत् ] $S_1S_2$**A**Bh, ॰पश्य $S_3$ **58c** द्वार॰ ] $S_1S_2S_3^{pc}$R**A**Bh, ⟨सं⟩द्वार॰ $S_3$ • तिष्ठन्तं ] $S_1S_2^{pc}S_3$R**A**Bh, ति(ष्ठ)न्तं $S_2^{ac}$ **58d** ॰पट्टस॰ ] $S_1S_2S_3$, ॰पट्टिश॰ Bh • ॰धारिणम् ] $S_1^{pc}S_2S_3$R**A**Bh, ॰वारिणम् $S_1^{ac}$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

तं दृष्ट्वा स तदा वह्निः समालोक्य समन्ततः।
नास्ति कश्चिदिहोपायः सूक्ष्मजन्तोरपि स्थिते॥ ५९॥
प्रवेष्टुमिति संचिन्त्य तमेव शरणं ययौ।
नन्दिनं हुतभुग्देवस्तुष्टाव च कृताञ्जलिः॥ ६०॥
नमो गणाधिपतये नमश्चण्डाय शूलिने।
नमः सेनाधिपतये नमः सर्वात्मने सदा॥ ६१॥
हालाहलाय रुद्राय नीलरुद्राय वै नमः।
नमो डाकिनिरुद्राय तथैवार्द्रपटाय च॥ ६२॥
नमस्ते स्वप्नरुद्राय भस्मरुद्राय ते नमः।
नमः श्मशानरुद्राय कोटीरुद्राय ते नमः॥ ६३॥
नमः पिङ्गलरुद्राय रुद्राधिपतये नमः।
नमः प्रमथरुद्राय भूतरुद्राय ते नमः।
विरूपाक्षाय रुद्राय श्वेतरुद्राय ते नमः॥ ६४॥
नमस्ते सततं देव नमस्ते सततं शिव।
नमस्ते सततं सौम्य नमस्ते भक्तिवत्सल॥ ६५॥
मम भक्तस्य देव त्वं देवानां हितमिच्छतः।
वरदो भव नन्दीश मा नः क्रोधं कृथाः प्रभो॥ ६६॥

---

**59d** स्थिते ] स्थितं R **61b** ॰श्चण्डाय ] ॰श्चामाय R **62a** रुद्राय ] भद्राय R **62c** डाकिनि॰ ] डाकिनी॰ R (unmetrical) **63cd** ] om. R **64d** ते ] वै R **66c** नन्दीश ] $R^{pc}$, नन्दीशो $R^{ac}$ **66d** मा नः ] मात्म R • कृथाः ] वृथा R

---

**59d** स्थिते ] स्थितं **A** **60a** प्रवेष्टु॰ ] $A_3A_4$, प्रवेष्णु॰ $A_7$ **61b** नमश्चण्डाय ] नमः{॰म $A_7$} शुद्धाय **A** **61d** सदा ] तदा **A** **62a** हालाहलाय ] हलाहलाय $A_3A_4$, हलाय हल॰ $A_7$ **63** ] om. **A** **64a** ॰रुदाय ] ॰नेत्राय **A** **64c–f** ] om. **A** **65bc** ] om. **A** **65d** भक्ति॰ ] $A_4A_7$, भक्त॰ $A_3$ **66** ] om. **A**

---

**59**⟨$c^5$–$c^8$⟩ $S_1$ **62**($c^3$–$c^5$)⟨$c^6$–$d^2$⟩ $S_1$ **63**($d^2$) $S_1$ **65**($b^2$–$b^3$)⟨$b^4$–$c^3$⟩ $S_1$ **66**($c^2$) $S_1$

---

**59a** दृष्ट्वा ] $S_1S_2$R**A**Bh, दृष्टा $S_3$ • वह्निः ] $S_2S_3$R**A**Bh, वह्नि $S_1$ **59b** समालोक्य ] $S_2S_3$R**A**Bh, समलोक्य $S_1$ **59c** ॰होपायः ] R**A**Bh, ॰होपायं $S_2$, ॰होपाय $S_3$ **60a** प्रवेष्टु॰ ] $S_1^{pc}S_2S_3$R$A_3A_4$Bh, प्रवेष्ठ॰ $S_1^{ac}$ **60d** ॰ताञ्जलिः ] $S_1S_2S_3^{pc}$R**A**Bh, ॰ताञ्जलि $S_3^{ac}$ **61b** ॰श्चण्डाय ] $S_1S_2$Bh, ॰श्चाण्डा-य $S_3$ **61c** नमः ] $S_1S_2$R**A**Bh, नम $S_3$ **61d** सर्वात्मने ] $S_2S_3$R**A**, शर्व्वात्मने $S_1$, शर्वात्मने Bh **62c** डाकिनि॰ ] $S_2^{ac}S_3$**A**, (डागि)ि ⌣ $S_1$, शकिनि॰ $S_2^{pc}$, ि ⌣ ि ⌣ ति॰ Bh (Bh possibly reads this in $S_1$) **62d** ॰वार्द्र॰ ] $S_2^{pc}S_3$R**A**Bh, ॰वार्द्रा॰ $S_1$, ॰वाद्र॰ $S_2^{ac}$ **64a** पिङ्गल॰ ] $S_2S_3$R**A**Bh, पिगल॰ $S_1$ **64b** ॰पतये ] $S_2S_3$R**A**Bh, ॰पतय $S_1$ (unmetrical) **64c** प्रमथ॰ ] $S_1S_3$RBh, प्रथम॰ $S_2$ **65b** शिव ] RBh (em.?), शिवः $S_2S_3$ **65d** भक्ति॰ ] $S_2S_3$R$A_4A_7$, भक्त॰ $S_1$Bh • ॰वत्सल ] R**A**Bh, ॰वत्सलः $S_1S_2S_3$ **66ab** त्वं देवानां ] $S_1S_2$RBh, देवाना $S_3$ (unmetrical) **66c** वरदो भव ] $S_1^{pc}S_2S_3$RBh, व(र)भो भर $S_1^{ac}$ • नन्दीश ] $S_2S_3R^{pc}$Bh, नंदीशं $S_1$ **66d** नः ] $S_2S_3$Bh, न $S_1$ • कृथाः ] em. Bh (silently), कृथा $S_1S_2S_3$ • प्रभो ] $S_1^{ac}S_3$RBh, प्रभोः $S_1^{pc}S_2$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

ततो नन्दीश्वरः प्राह स्तुवन्तमनलं स्थितम्।
प्रीतस्तवानया वह्ने भक्त्याहं सुरसत्तम।
ब्रूहि किं ते प्रियं देव करोम्यद्य हुताशन॥ ६७॥
अथ प्रोवाच वह्निस्तं वरदं नन्दिनं स्थितम्।
यदि तुष्टो ऽसि मे देव देयो यदि वरश्च मे॥ ६८॥
देवकार्येण देवेश प्रवेष्टुं दीयतां मम।
भवनं देवदेवस्य वर एषो ऽस्तु मे विभो॥ ६९॥
तं नन्दी प्रत्युवाचेदं कृच्छ्रं देयो वरो ह्ययम्।
न तं शक्ष्यसि देवेशं द्रष्टुं त्वं योगमास्थितम्।
सह देव्या महेशानं स्रष्टारं जगतो ऽव्ययम्॥ ७०॥
तथाप्येष मया तुभ्यं देय एव वरो ऽनल।
गच्छ सूक्ष्मतरो भूत्वा दुरालक्ष्यो हुताशन।
प्रविश्य निष्क्रम क्षिप्रमविज्ञातागमक्रियः॥ ७१॥

---

**29b** °षार्यमा त° ] R**A**Bh, °षार्यमास्त° $S_1S_3$ **29c** कापाली ] $S_1$**A**Bh, कापीली $S_3$ **29d** महाबलाः ] $S_3$R**A**Bh, महाबला $S_1$ **29e** नासत्यश्चैव ] $S_1^{pc}S_3$RBh, नास ⏓(चै)व $S_1^{ac}$ • दस्रश्च ] $S_1$RBh, दक्षश्च $S_3$ **30d** वेगवन्तो ] $S_1S_3$, बलवन्तो Bh **31a** गर्जन्तो ] $S_1^{ac}S_3$RBh, गर्जान्तो $S_1^{pc}$ **31b** युगान्ते अ° ] conj. Bh (silently), युगन्तो अ° $S_1$, युगान्तान्ते $S_3$ **31c** प्रभञ्जना ] $S_3$RBh (em.?), (प्र)भजन $S_1$ (tops lost, unmetrical) **31d** चाचलाः ] $S_1^{pc}S_3$RBh, चा⟨(ल)⟩+च+लाः $S_1$ **32a** नर्दन्तो ] $S_3$Bh (em.?), नर्न्दन्तो $S_1$ **32b** बृंहन्त ] RBh (em.?), बृहन्त $S_1$, बृङ्हत $S_3$ (unmetrical) **32c** ग्रसन्त° ] $S_1$RBh, स्रसन्त° $S_3^{pc}$, स्रगन्त° $S_3^{ac}$ **32cd** °हाश्छिन्दन्तो ] RBh (em.?), °हा च्छिन्दतो $S_1S_3$ **33a** वर्षमाणा ] $S_1$RBh, वर्षमाण $S_3$ • घनाः ] RBh (em.?), घना $S_1S_3$ **33b** नर्दनाः ] $S_3$, न(न्द)ना $S_1$, नर्दिनः Bh (conj., Bh reads नादिनः in $S_1$) **33d** °व व्यनाशयन् ] **A**, °वा(व्य) – ⏑यत् $S_1$, °व व्यनाशयत् $S_3$, °वाभ्यवारयन् Bh (conj.?)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

तद्देववेगप्रहतातिवेगं बलं समन्ताद्दनुदानवानाम् ।
भवत्यनाधारमतिप्रसक्तं तृणं यथा वह्निमुखावसक्तम् ॥ ३४ ॥

इति स्कन्दपुराणे ऽष्टाशीतितमो ऽध्यायः ॥ ८८ ॥

---

**34a** तद्देव° ] तदेव R **34b** °द्दनु° ] °द्दल° R **34c** °त्यनाधार° ] °त्यनाचार° R **34d** °खावसक्तम् ] °खप्रसक्तम् R **Col.** इति स्कन्दपुराणे रेवाखण्डे ऽध्यायः R

---

**34ab** °वेगं बलं ] $A_3A_4$, °वेलम्वनं $A_7$ **34b** समन्ताद्दनु° ] समन्तादनु° **A** **34c** °त्यनाधारमतिप्रसक्तं ] °त्यनाचारमतिसंस{°श° $A_3A_7$}क्त° **A** **34d** °सक्तम् ] $A_3A_4$, °शक्तं $A_7$ **Col.** इति{इति श्री° $A_3$} स्कन्दपुराणे एकाशीतिसाहस्रयां संहिताया{इति स्कंद° $A_4$}मम्बिकाखण्डे द्वन्द्वयुद्धं नामाध्यायः **A**±

---

**34**($a^{11}$–$c^{1}$)⟨$c^{2}$–$c^{4}$⟩ $S_1$

---

**34a** तद्देव° ] **A**Bh, तदेव $S_1S_3$ • °वेग° ] $S_3$R**A**Bh, वेगेन $S_1$ (unmetrical) • °हताति° ] $S_3$R**A**, °हताभि° $S_1$Bh **34b** बलं ] $S_1RA_3A_4$Bh, बल $S_3$ (unmetrical) • समन्ताद्दनु° ] em., (सयन्तादनु°) $S_1$, समन्तादनु° $S_3$, सयत्नं दनु° Bh (conj.) **34c** °त्यनाधार° ] $S_3$Bh (em.?), ˘ –धार° $S_1^{ac}$, ˘ –वार° $S_1^{pc}$ • °मतिप्रसक्तं ] RBh (em.?), °मतिप्रसक्त $S_1$, °मविप्रसक्तं $S_3$ **34d** °सक्तम् ] $S_3RA_3A_4$Bh, °सक्तमिति $S_1$ (इति part of col.) **Col.** ⊙॥ स्कन्द(पुराणे) युद्धे आद्यायः १४४ (in letter numerals)॥ ⊙ $S_1$, ⊙॥ स्कन्दपुराणे नामाध्यायः ८८ (in letter numerals)॥ ⊙ $S_3$, इति स्कन्दपुराणे युद्धेष्टाशीतितमोध्यायः Bh

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

# एकोननवतितमो ऽध्यायः।

सनत्कुमार उवाच।
तेषां तद्वेगनुन्नानां प्रभग्नानां नशिष्यताम्।
त्राणार्थमतिदीप्ताक्षो हिरण्याक्षो ऽग्रहीत्पदम्॥ १॥
अन्धकश्च महामायो भ्रातरश्चास्य तत्समाः।
शतं रथसहस्राणां सर्वेषामपलायिनाम्॥ २॥
प्रह्लादश्च सहभ्राता हिरण्यकशिपोः सुतः।
विप्रचित्तिः सहभ्राता सैंहिकेयैश्च तैः सह।
गृह्ण गृह्णेति नर्दन्तो देवान्प्रत्युद्ययुस्तदा॥ ३॥
तेषां तेषां च संग्रामः सुघोरः समपद्यत।
ग्रहाणामिव कालान्ते गजानामिव चाजने॥ ४॥

---

**1** सनत्कुमार ] सनत्कुमामार R **1a** तद्वेगनुन्नानां ] तद्वद्धवेगानां R **1b** ◦भग्नानां न◦ ] ◦भग्नाना-म◦{◦न◦ $R^{pc}$ ?} R **1c** त्राणार्थमतिदीप्ताक्षो ] त्राणमलभमानानां R **2d** ◦पलायिनाम् ] ◦पनायिनाम् R **3a** ◦भ्राता ] भ्रात्रा R **3c** ◦भ्राता ] भ्रात्रा R **3d** सैंहिकेयैश्च ] सैंहिकेयश्च R **4ab** ] om. R **4d** गजानामिव चाजने ] प्रजानामिव चात्यये R

---

**1a** तद्वेगनुन्नानां ] तद्वश{◦स◦ $A_7$}गानां च $A_3A_7$, तद्वगानां च $A_4$ (unmetrical) **1b** प्रभग्नानां नशिष्यताम् ] भग्नानां क्लिश्य{◦नो क्लिष्य◦ $A_4$, ◦नां हृष्ट◦ $A_7$}तां पुनः **A** **1c** ◦मतिदीप्ताक्षो ] ◦मि{◦सिं◦ $A_7$}ह संप्राप्तो **A** **1d** ऽग्रहीत्पदम् ] भ्ययात्सुतं **A** **2d** ◦पलायिनाम् ] $A_3A_4$, ◦पनायिनां $A_7$ **3a** प्रह्लाद◦ ] $A_3A_4$, प्रह्राद◦ $A_7$ • ◦भ्राता ] भ्रात्रा **A** **3b** ◦कशिपोः ] $A_3A_4$, ◦कशिपो $A_7$ **3c** ◦भ्राता ] $A_7$, भ्रात्रा $A_3A_4$ **3d** सैंहिकेयै◦ ] $A_4A_7$, सैहिकेयै◦ $A_3$ **3e** नर्दन्तो ] $A_3A_7$, नदंतो $A_4$ (unmetrical) **4ab** संग्रामः सुघोरः समपद्यत ] तुमुलः सुघो{तुमुलमुच्चा◦ $A_3A_4$}रस्त्वभवत्तदा **A** **4c** कालान्ते ] कालास्ते **A** **4d** चाजने ] चाजिरे **A**

---

Manuscripts available for this chapter: $S_1$ 8.20b (f. 142$^r$), 8.21a (f. 142$^v$), 8.23b (f. 143$^r$) and 8.24 (f. 143$^v$); $S_3$ f. 143$^r$–145$^r$ (f. 144$^r$ largely retraced); R f. 162$^r$–164$^r$; $A_3$ f. 95$^r$–96$^r$; $A_4$ f. 137$^v$–139$^r$; $A_7$ f. 134$^r$–135$^v$.
**1**($c^4$) $S_1$, ($c^2$) $S_3$ **2**($d^3$)⟨$d^4$–$d^5$⟩ $S_1$ **3**($d^2$–$d^3$) $S_1$, ($a^5$–$a^6$, $e^2$) $S_3$

---

**1a** ◦नुन्नानां ] $S_3^{pc}$Bh (conj.?), ◦नुन्नादा $S_1$, ◦नुनानां $S_3^{ac}$ (unmetrical) **1b** प्रभग्नानां नशिष्यताम् ] em., प्रभग्नानन्नशिष्यतां $S_1$, प्रभग्नानां तमिष्यताम्{◦न् $S_3^{ac}$} $S_3$, भग्नानां क्लिश्यतां पुनः Bh **1c** त्राणार्थ◦ ] $S_1S_3^{ac}$**A**Bh, त्रा(पा)र्थ◦ $S_3^{pc}$ **1d** ◦हीत्पदम् ] $S_1$RBh, ◦ही प्रदं $S_3$ **2b** ◦श्चास्य ] $S_3$R**A**Bh, ◦श्च $S_1$ (unmetrical) • तत्समाः ] $S_1$R**A**Bh, तत्समा $S_3$ **3a** प्रह्लाद◦ ] $S_1RA_3A_4$Bh, प्रह्राद◦ $S_3$ **3b** ◦कशिपोः सुतः ] $RA_3A_4$Bh, ◦कशिपोत्सुतः $S_1$, ◦कशिपोः सुतं $S_3$ (retraced) **3c** विप्रचित्तिः ] R**A**Bh, विप्रचित्ति $S_1S_3$(retraced) **3d** सैंहिकेयैश्च ] $S_1S_3^{ac}A_4A_7$Bh, सैङ्हिकेयोश्च $S_3^{pc}$ (retraced) • तैः ] $S_1$R**A**Bh, तै $S_3$ (retraced) **3e** गृह्ण गृह्णेति ] $S_1$R**A**Bh, गृ(द्ध){(◦ह्ण) $S_3^{ac}$} गृह्नेति $S_3$ (retraced) • नर्दन्तो ] $RA_3A_7$Bh, नन्दन्तो $S_1$, निर्द्दन्तो $S_3$ (retraced) **3f** देवान्प्रत्युद्य◦ ] R**A**Bh, देवा प्रद्युद्य◦ $S_1$, देवा प्रत्युद्य◦ $S_3$ **4a** संग्रामः ] em. Bh (silently), संग्राम $S_1$, सग्राम $S_3$ **4b** सुघोरः ] $S_3$Bh (em.?), सुघोर $S_1$ • समपद्यत ] em. Bh (silently), समपद्यतः $S_1$, सो भवत्तदा $S_3$ **4c** ग्रहाणा◦ ] $S_1$R**A**, ग्रहणा◦ $S_3$, ग्राहाणा◦ Bh (conj.) • कालान्ते ] $S_3$R, कान्ते च $S_1$, काण्डे च Bh (conj.?) **4d** चाजने ] $S_1^{pc}S_3$, (जं)जने $S_1^{ac}$, वा वने Bh (conj.)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

इन्द्रस्त्वष्टा च पूषा च हिरण्याक्षं महाबलम्।
संगत्य सायकैस्तीक्ष्णैः सर्वमर्मस्वताडयन्॥ ५॥
तेषां धनूंषि चित्राणि अस्यतां तु दिवौकसाम्।
मायाबलेन दैत्येन्द्रो व्यष्टम्भयत दीप्तिमान्॥ ६॥
तानि विष्टम्भितानि स्म तदा दैत्येन मायया।
नानमन्ति यथापूर्वं ततस्ते ह्याकुलाभवन्॥ ७॥
सो ऽपि दैत्यो महामायो नदित्वा मेघनिस्वनम्।
बबन्ध तेषां गात्राणि समन्तादस्त्रमायया॥ ८॥
तान्बद्धान्प्रसमीक्ष्यैवमकर्मण्यान्महाबलान्।
यन्तारो वाहनैः क्षिप्रं जह्रुस्तस्माद्रणाजिरात्॥ ९॥
अथ कालो यमश्चैव धनेशो मित्र एव च।
वरुणो वसवः सर्वे अश्विनौ च महाबलौ॥ १०॥
प्रगृहीतायुधाः क्रुद्धास्तिष्ठ तिष्ठेतिवादिनः।
अभ्यद्रवन्त वेगेन हिरण्याक्षं महासुरम्॥ ११॥

---

**5c** संगत्य ] संहत्य R **5d** ॰ताडयन् ] ॰ताडयत् R **6b** तु ] त्रि॰ R **6d** दीप्तिमान् ] दीप्तमान् R **7d** ह्याकुला॰ ] व्याकुला॰ R **8b** ॰निस्वनम् ] ॰निस्वनः R **9ab** तान्बद्धान्प्रसमीक्ष्यैवमकर्मण्यान् ] विष्टब्धांस्तु सकार्प्यण्यान् R (unmetrical) **9d** जह्रुस्त॰ ] जग्मुस्त॰ R **10d** अश्विनौ ] चाश्विनौ R **11ab** क्रुद्धास्ति॰ ] सर्व्वे ति॰ R

---

**5c** संगत्य ] संहत्य **A** • सायकैस्ती॰ ] $A_3A_7$, सायकैः स्ती॰ $A_4$ **5d** ॰स्वताडयन् ] ॰स्वताडयत् $A_7$, ॰सु ताडयत् $A_3A_4$ **6a** धनूंषि ] $A_3^{pc}$, धनुंषि $A_3^{ac}A_4A_7$ **6b** अस्यतां ] आस्यतां **A** **6d** व्यष्टम्भ॰ ] व्यस्तम्भ॰ **A** • दीप्तिमान् ] $A_3A_4$, दीप्तवान् $A_7$ **7c** नानमन्ति ] नाशयन्ति **A** **8b** नदित्वा ] $A_4$, नादित्वा $A_3A_7$ **9a** तान्बद्धान्प्र॰ ] तान्बहद्धान् $A_7$, तानुक्त्वा न $A_3A_4$ **9ab** ॰समीक्ष्यैवमकर्मण्यान् ] समीक्ष्यै{॰क्षै॰ $A_4A_7$}वं स्वकर्म्मणा **A** **9b** ॰बलान् ] $A_7$, ॰बलात् $A_3A_4$ **9d** जह्रुस्त॰ ] जुहुस्त॰ $A_3A_4$, जहस्त॰ $A_7$ • ॰द्रणाजिरात् ] ॰द्रणाजिरे **A** **11a** ॰तायुधाः ] $A_3A_4$, ॰तायुधा $A_7$ **11ab** क्रुद्धास्तिष्ठ ] सर्वे तिष्ठ{॰ष्ट $A_4$} **A** **11d** महासुरम् ] महाबलं **A**

---

**5**(b⁶)⟨b⁷–b⁸⟩ $S_1$ **8**⟨c¹–c²⟩ $S_1$ **9**(a⁴)⟨a⁵⟩ $S_1$ **11**(b⁷–b⁸) $S_1$

---

**5a** इन्द्रस्त्व॰ ] $S_3$R**A**Bh, इन्द्र त्व॰ $S_1$ **5b** ॰क्षं महाबलम् ] $S_3$R**A**, ॰क्षं म(ह) ˘ ⏑̲ $S_1$ (right side of ह lost), ॰क्षमवारयन् Bh (conj.?) **5c** ॰कैस्तीक्ष्णैः ] R$A_3A_7$Bh, ॰कै तीक्ष्णै $S_1$, ॰कैस्तीक्ष्णै $S_3$ **5d** ॰ताडयन् ] em. Bh (silently), ॰ताडयत् $S_1S_3$ **6a** ॰षां धनूंषि ] $S_1$R$A_3^{pc}$Bh, ॰षान्धनुंषि $S_3$ (retraced) **6d** दीप्तिमान् ] $S_3A_3A_4$Bh, दीप्तिमाम् $S_1$ **7a** विष्टम्भितानि ] $S_1$R**A**Bh, विष्टभितानि $S_3$ **7c** नानमन्ति ] $S_1$RBh, नानयन्ति $S_3$ **7d** ततस्ते ] $S_3$R**A**Bh, तत्रस्ते $S_1$ • ॰भवन् ] R**A**Bh, ॰भवत् $S_1S_3$ **8a** दैत्यो ] $S_1^{pc}S_3$R**A**Bh, दात्यो $S_1^{ac}$ **9a** तान्बद्धान्प्र॰ ] $S_3$, तां बद्धा(म्प्र॰) $S_1$, तान् बद्धांश्च Bh (conj.) • ॰समीक्ष्यैव॰ ] em. Bh (silently), ˘मीक्षैव॰ $S_1$, ॰समीक्ष्येव॰ $S_3$ **9b** ॰मकर्मण्यान्म॰ ] em. Bh (silently), ॰मकर्म्मण्याम्म॰ $S_1$, ॰मकर्मन्य⟨ह⟩+म+॰ $S_3$ • ॰बलान् ] R$A_7$Bh (em.), ॰बलाः $S_1$, ॰बलात् $S_3$ **9c** वाहनैः ] $S_3$R**A**Bh, वाहनै $S_1$ • क्षिप्रं ] $S_1$R**A**Bh, क्षिप्र $S_3$ **9d** जह्रुस्त॰ ] $S_3$Bh (em.), जह्रस्त॰ $S_1$ • ॰द्रणाजिरात् ] RBh (em.?), ॰द्रणाजिरान् $S_1$, ॰द्रणाजिरे $S_3$ **10c** वरुणो ] $S_1$R**A**Bh, वरुणे $S_3$ • वसवः सर्वे ] R**A**Bh, वासवस्सर्व्वे $S_1^{pc}$, वासव सर्व्वे $S_1^{ac}$, वस्तवश्चैव $S_3$ **11a** ॰तायुधाः ] R$A_3A_4$Bh, ॰तायुधा $S_1S_3$ **11ab** क्रुद्धास्तिष्ठ ] $S_1$Bh, क्रुद्धा तिष्ट $S_3$ **11c** ॰द्रवन्त ] $S_3$R**A**Bh, ॰द्रवन्ता $S_1$ **11d** हिरण्याक्षं ] $S_1$R**A**Bh, हिरण्याक्षो $S_3$ • महासुरम् ] $S_1S_3^{pc}$RBh, महासुरां $S_3^{ac}$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

तेषामापततां संख्ये स दैत्यः क्रोधमूर्छितः ।
सर्वेषां सायकैस्तीक्ष्णैर्बिभेद कवचान्युधि ॥ १२ ॥
ते भिन्नकवचाः सर्वे क्रोधात्प्रज्वलिताननाः ।
ससर्जुरस्त्रमुख्यानि तदाप्रतिहतान्युत ॥ १३ ॥
यमो दण्डं ससर्जास्य तथा कालश्च किंकरम् ।
धनेशश्चाशनिं घोरं वरुणः पाशमेव च ।
भगश्च मुसलं घोरमन्ये चान्यांस्तथा शरान् ॥ १४ ॥
तान्स दैत्यो हसन्नेव सायकैर्मर्मभेदिभिः ।
व्यष्टम्भयददीनात्मा शक्रहस्तं यथा भवः ॥ १५ ॥
साधुवादांस्ततो हृष्टा दानवानां महारथाः ।
समं चक्रुश्च संपूज्य हिरण्याक्षाय सर्वतः ॥ १६ ॥
अपरे नैतदाश्चर्यं दितिपुत्रस्य संयुगे ।
कश्यपेन प्रसूतस्य राज्ञो ऽस्माकं च स्वामिनः ॥ १७ ॥

---

**13b** ◦ताननाः ] $R^{ac}$, ◦तानलाः $R^{pc}$ **13c** ससर्जुरस्त्रमुख्यानि ] ससृजुः शरवर्षाणि R **14e** मुसलं ] मुषलं R **14f** ◦था शरान् ] ◦थापरान् R **16a** ◦वादांस्त◦ ] ◦वादास्त◦ R **16b** दानवानां ] दानवास्ते R **16c** समं ] शमं R **16d** सर्वतः ] सर्व्वशः R **17c** कश्यपेन ] काश्यपेन R

---

**13ab** ] om. **A** **13c** ससर्जुर◦ ] ससृजुर◦ **A** (unmetrical) **13d** ◦तान्युत ] ◦तायुधाः **A** **14b** तथा कालश्च किंकरम् ] कालस्य चिंतवस्तदा $A_3$, कालस्य विनशेद्य{य◦ $A_7$}था $A_4A_7$ **14c–15b** ] om. **A** **15cd** ◦ददीनात्मा शक्र◦ ] ◦दमेयात्मा चक्र◦ **A** **16a** ◦वादांस्त◦ ] $A_7$, ◦वादास्त◦ $A_4$, ◦वादस्त◦ $A_3$ • हृष्टा ] दृष्ट्वा **A** **16b** ◦रथाः ] $A_3A_4$, ◦रथा $A_7$ **17ab** ] om. **A** **17c** कश्यपेन ] कश्यपेण $A_7$, काश्यपेन $A_3A_4$

---

**14**(b[7])⟨b[8]⟩ $S_1$ **16**⟨d[7]–d[8]⟩ $S_1$ **17**(c[8]) $S_3$

---

**12a** संख्ये ] R**A**Bh, संखे $S_1$, व्यास $S_3$ **12b** दैत्यः ] $S_3$R**A**Bh, दैत्य $S_1$ • ◦मूर्छितः ] $S_1$R**A**Bh, ◦मूच्छितः $S_3$ **12cd** ◦कैस्तीक्ष्णैर्बि◦ ] R**A**Bh, ◦कै तीक्ष्णै बि◦{(मि◦) $S_1^{ac}$} $S_1$, ◦कैस्तीक्ष्णै बि◦ $S_3$ **12d** कवचान् ] $S_1$R**A**Bh, कचान् $S_3$ (unmetrical) **13a** ◦कवचाः ] $S_1$RBh, ◦कवचा $S_3$ **13b** क्रोधात् ] RBh (em.?), क्रोधा $S_1S_3$ • ◦ताननाः ] $R^{ac}$Bh (em.?), ◦तानना $S_1S_3$ **13c** ससर्जुर◦ ] $S_3$Bh (em.), ससर्जर◦ $S_1$ **13d** ◦न्युत ] RBh (em.?), ◦न्युतः $S_1S_3$ **14a** दण्डं ] $S_3$R**A**Bh, दण्ड $S_1$ • ससर्जास्य ] R**A**Bh, ससर्ज्यास्य $S_1$, ससर्जस्य $S_3$ **14b** कालश्च ] RBh (conj.), कालस्य $S_1S_3$ • किंकरम् ] $S_3$R, कि(ङ्क)⏑̱ $S_1$, – – – Bh **14c** ◦श्चाशनिं ] RBh (conj.?), ◦श्चाननिर् $S_1$, ◦श्चाशनि $S_3$ (unmetrical) **14d** वरुणः ] RBh (em.?), वरुणं $S_1$, वरुण $S_3$ (unmetrical) **14e** मुसलं ] $S_1S_3$, मुशलं Bh (em.?) **14f** ◦था शरान् ] $S_1S_3$, ◦थामराः Bh (conj.) **15a** हसन्नेव ] $S_1$RBh, हसनेव $S_3$ (unmetrical) **15b** ◦कैर्मर्म◦ ] RBh (em.?), ◦कैर्म्मत्म◦ $S_1$, ◦कै मर्म◦ $S_3$ **15d** भवः ] $S_1$R**A**Bh, भव $S_3$ **16a** ◦वादांस्त◦ ] $A_7$Bh (em.?), ◦वादास्त◦ $S_1S_3$ **16b** दानवानां ] $S_1^{pc}$**A**Bh, दानवाम् $S_1^{ac}$ (unmetrical), दानवाना $S_3$ • ◦रथाः ] R$A_3A_4$Bh, ◦रथा $S_1S_3$ **16d** ◦क्षाय सर्वतः ] $S_3$**A**, ◦क्षाय स ⏑ ⏑̱ $S_1$, ◦क्षं महासुरम् Bh (conj.) **17a** अपरे नैतदाश्चर्यं ] RBh (em.?), अपरेणैस्तदाश्चर्यन् $S_1$, अपरे नेतदाचार्यं $S_3$ **17c** कश्यपेन ] em. Bh, काश्यपेन $S_1S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

अपरे सिंहनादांश्च बाहुशब्दांश्च पुष्कलान्।
चक्रुर्हृष्टाश्च वाद्यानि तदा सर्वाण्यवादयन्॥ १८॥
एवं तेषां प्रहृष्टानां दानवानां महाहवे।
पाराशर्य गिरो बह्वचः श्रूयन्ते स्तुतिसंहिताः॥ १९॥
तेषां प्रहर्षं ज्ञात्वा तं देवभङ्गं च तं तदा।
सर्वप्राणिचरो वायुरसुरानभिदुद्रुवे॥ २०॥
सहस्रनल्वमात्रेण स रथेन प्रभञ्जनः।
समन्ताद्ध्वजयुक्तेन पताकाशतमालिना॥ २१॥
जवेन यन्तृणा यत्नान्निगृहीतेन शब्दवान्।
प्रपूरयन्दिशः सर्वाः सहसा प्रत्यदृश्यत॥ २२॥
स पञ्चभिः शरैस्तीक्ष्णैर्दैत्यराजानमव्यथः।
आहत्य योजने तस्माद्देशात्क्षिप्रमवासृजत्॥ २३॥

---

**18d** सर्वाण्य° ] सर्व्वान्य° R **19a** प्रहृष्टानां ] प्रकृष्टानां R **19cd** गिरो बह्वचः श्रूयन्ते ] गिरौ रक्षः श्रूयते R **20a** तेषां प्रहर्षं ज्ञात्वा तं ] हर्षितश्चैव तेषान्तु R **20b** तं तदा ] तन्तथा R **20c** °प्राणिचरो ] °प्राणहरो R **20d** °रसुरान° ] °र्दानवान° R **21b** प्रभञ्जनः ] प्रजिष्णुना R **21c** समन्ताद्ध्वजयुक्तेन ] om. R (unmetrical) **22a** यन्तृणा यत्नान् ] यन्त्रिणा तत्र R **22c** प्रपूरयन् ] अपूरयद् R **23b** °राजानमव्यथः ] °राजं व्यताडयत् R **23cd** ] om. R

---

**18–19** ] om. **A** **20ab** ] तेषां प्रहरणं ज्ञात्वा तं देवो भगवांस्तदा **A**± **21ab** ] स सहस्रानश्वयुक्तेन सुरथेन प्रजेष्ठि{°ष्टि° $A_4$}ना $A_3A_4$ (unmetrical), स सहश्रयुक्तेन सुरथेन महाप्रजाः $A_7$ (unmetrical) **21c** °द्ध्वज° ] °द्ध्रज° **A** **22a** यन्तृणा ] पत्रिणां **A** **22ab** यत्नान्नि° ] $A_3A_7$, यत्नत् नि° $A_4$ **22c** प्रपूरयन् ] अपूरयन् **A** **22d** °दृश्यत ] $A_3A_4$, °दृश्यते $A_7$ **23a** स पञ्चभिः ] पंचभिः स $A_3A_4$, पञ्चानां स $A_7$ **23ab** शरैस्तीक्ष्णैर्दैत्य° ] $A_3$, शरैः स्तीक्ष्णैर्देव° $A_4$, शरैस्तीक्ष्णै दैत्य° $A_7$ **23b** °राजानमव्यथः ] °राजमविध्यत **A** **23c** °त्य योजने ] °त्यायोधने **A** **23d** °प्रमवासृजत् ] °प्रं समन्ततः **A**

---

**18**($b^8$) $S_1$, ($a^5$) $S_3$ **19**($d^4$–$d^7$)⟨$d^8$→⟩ $S_1$ **20**⟨←$a^1$–$a^2$⟩($c^6$) $S_1$ **21**($a^7$) $S_3$

---

**18a** सिंह° ] $S_1S_3^{pc}$RBh, सिह° $S_3^{ac}$ **18b** °शब्दांश्च ] RBh (conj.?), °शब्दां सु° $S_1$, °शब्दाश्च $S_3$ **18c** चक्रुर्हृष्टा° ] RBh (em.?), चक्रु ह्यष्टो° $S_1$, चक्रु हृष्टा° $S_3$ • वाद्यानि ] $S_3$RBh (conj.?), वाक्यानि $S_1$ **18d** तदा ] $S_3$R, तथा $S_1$Bh • °वादयन् ] $S_3$RBh (em.?), °वादयत् $S_1$ **19a** एवं तेषां ] $S_3$R, एवंन्ते सं° $S_1$, एवं हि सं° Bh (conj.) **19c** पाराशर्य ] $S_3$RBh (em.?), पाराशय्य $S_1$ • गिरो बह्वचः ] $S_3$Bh (conj.?), शिरो बाह्वचः $S_1^{pc}$, शिरो बाह्वः $S_1^{ac}$ **19d** °संहिताः ] R, (°सक्ति)⏑̲ $S_1$, °सहिता $S_3$ (unmetrical), – – – Bh **20a** प्रहर्षं ] em. Bh (silently), प्रहर्ष $S_1S_3$ • ज्ञात्वा तं ] $S_3$ (cf. **A**), ज्ञात्वा त्वं $S_1$, ज्ञात्वेत्थं Bh (conj.?) **20b** °भङ्गं च ] $S_3$RBh (em.?), °भगं च{(व) $S_1^{ac}$} $S_1$ (unmetrical) **20d** °नभि° ] $S_1$R**A**Bh, °नाभि° $S_3$ **21a** °मात्रेण ] $S_1$RBh, °चा(त्रे)ण $S_3$ (retraced) **21d** पताका° ] $S_3$(retraced)R**A**Bh, पताक° $S_1$ **22a** यन्तृणा ] em., यन्त्रिणा $S_1S_3$, यन्तृणां Bh (conj.) **22ab** यत्नान्नि° ] $A_3A_7$Bh, यत्ना नि° $S_1S_3$ **22c** °शः सर्वाः ] R**A**Bh, °शस्सर्व्वा $S_1$, °शः सर्वा $S_3$ (retraced) **22d** °दृश्यत ] $S_1^{pc}$R$A_3A_4$Bh, °दृश्यतः $S_1^{ac}S_3$(retraced) **23a** शरैस्तीक्ष्णैर् ] $S_1$R$A_3$Bh, शरै तीक्ष्णै $S_3$ (retraced) **23b** °राजानमव्यथः ] $S_1$, °राजानमव्यथत्+:+ $S_3$ (retraced), °राजमथाव्यथः Bh (conj.) **23cd** तस्माद्देशात् ] **A**Bh, तस्माद्देशा $S_1$, तस्मा देशात् $S_3$ (retraced)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

अन्धकं च ततः षष्ट्या विप्रचित्तिं च सप्तभिः।
मयं पञ्चाशता विद्धा सप्तभिः सप्तभिः पुनः॥ २४॥
दैत्यांश्च दानवांश्चैव सर्वान्विव्याध तत्क्षणात्।
पुनः पुलोमपुत्रांश्च निवातकवचानपि॥ २५॥
ते तेन बहुभिर्विद्धाः शरैरसुरपुंगवाः।
दिक्षु सर्वासु विक्षिप्ता योजनान्तरिताः स्थिताः॥ २६॥
यान्यांश्च ते विमुञ्चन्ति गदामुसलपट्टसान्।
तान्सर्वान्भगवान्वायुर्दानवोपर्यपातयत्॥ २७॥
ते हता हन्यमानाश्च स्वमुक्तैरायुधैर्भृशम्।
आर्तनादान्प्रकुर्वाणाः प्राद्रवन्त दिशो दश॥ २८॥
सो ऽपि वायुर्महावेगो बभञ्ज रथसत्तमान्।
पांसुवर्षेण च पुनश्चक्षूंष्येषामपूरयत्॥ २९॥

---

**24b** सप्तभिः ] पञ्चभिः R **24c** मयं ] मयः R • विद्धा ] विद्धः $R^{pc}$, विद्धो $R^{ac}$ **26a** ते तेन ] तलेन R **27a** यान्यांश्च ते वि॰ ] पलायांश्चैव R **27b** ॰मुसलपट्टसान् ] ॰मुषलपार्ष्णिकान् R **27c** तान्सर्वान् ] ताञ्छरान् R **27d** ॰र्दानवोपर्य॰ ] ॰र्दानवेभ्यो न्य॰ R **28b** स्वमुक्तैरा॰ ] वायुना स्वा॰ R **28c** ॰नादान् ] ॰नादं R **28cd** ॰कुर्वाणाः प्रा॰ ] कुर्व्वाणा व्य॰ R **29a** सो ऽपि ] सो ऽथ R **29b** ॰सत्तमान् ] ॰मुत्तमम् R **29c** पांसु॰ ] पांशु॰ R **29d** ॰ष्येषाम॰ ] ॰ष्येवाव॰ R

---

**24a** षष्ट्या ] $A_3A_4$, षष्ठया $A_7$ **24cd** ] मयं पंचशता तारं सप्तसप्तभिरेव च **A**± **26a** ते तेन ] तेन ते **A** **26d** योजनान्तरिताः स्थिताः ] ये{पे $A_4$} तेनासुरमास्थिताः{॰ता $A_4$} **A** **27a** यान्यांश्च ] ये न्यांश्च **A** **27b** ॰मुसलपट्टसान् ] ॰मुष{॰ख॰ $A_4$}लपट्टिशान् **A** **27d** ॰र्दानवोपर्यपातयत् ] ॰र्दानवे पर्यवारयन् **A** **28b** स्वमुक्तैरायुधैर् ] सुमु{ससु॰ $A_7$}खैराहता **A** **28c** ॰नादान् ] ॰नादं **A** **28d** प्राद्रवन्त ] प्रद्रवन्त $A_3A_7$, प्रद्रंवंत $A_4$ **29b** ॰सत्तमान् ] ॰मुत्तमं **A** **29c** पांसुवर्षेण ] $A_3A_4$, पांशु-वर्षेन $A_7$ **29cd** ॰नश्चक्षूंष्ये॰ ] $A_3^{pc}$, ॰नश्चक्षुंष्ये॰ $A_3^{ac}$, ॰नश्चक्षुश्ये॰ $A_4$, ॰नः चक्षुंषे॰ $A_7$

---

**26**($d^6$) $S_1$ **28**($d^7$)⟨$d^8$⟩ $S_1$

---

**24a** षष्ट्या ] $S_1RA_3A_4$Bh, षष्ठया $S_3$ (retraced) **24b** सप्तभिः ] $S_3$(retraced)**A**Bh, सप्ततिः $S_1$ **24cd** ] em. Bh (silently), मयं पञ्चाशतं विध्वा सप्तभिः सप्ततिः पुनः $S_1$, सप्तभिः पुनः $S_3$ (unmetrical, retraced) **25a** दैत्यांश्च ] R**A**Bh, दैत्याश्च $S_1S_3$ • दानवां॰ ] $S_3$R**A**Bh, दानवा॰ $S_1$ **25b** स-र्वान् ] $S_1$R**A**Bh, सर्वथा। $S_3$ (unmetrical) • तत्क्षणात् ] $S_3$R**A**Bh, तक्षणात् $S_1$ **25c** पुनः ] $S_1^{pc}$ $S_3$(retraced)R**A**Bh, पुन $S_1^{ac}$ (unmetrical) **25d** ॰कवचा॰ ] $S_1$R**A**Bh, ॰कावचा॰ $S_3$ (retraced) **26a** ते तेन ] $S_1$Bh, ते नेन $S_3$ • ॰भिर्विद्धाः ] R**A**Bh, ॰भिर्विद्धां $S_1$, ॰भि विध्वा $S_3$ (unmetrical, retraced) **26d** स्थिताः ] $RA_3A_7$Bh, स्थिता $S_1S_3$ **27a** यान्यांश्च ] conj. Bh (silently), या(सां)श्च $S_1^{ac}$, यो न्यांश्च $S_1^{pc}$, यान्याश्च $S_3$ (retraced) **27b** ॰मुसल॰ ] $S_1S_3$(retraced), ॰मुशल॰ Bh (em.?) • ॰पट्टसान् ] $S_1S_3^{ac}$, ॰पट्टिसां $S_3^{pc}$, ॰पट्टिशान् Bh **27c** ॰न्वायुर् ] $S_1$R**A**Bh, ॰न्वायु $S_3$ (retraced) **27d** ॰वोपर्य॰ ] $S_1S_3^{ac}$ ? Bh, ॰वोपर्यु॰ $S_3^{pc}$ (retraced) **28a** हता ] $S_1$R**A**Bh, हन्य $S_3$ (retraced) **28b** ॰मुक्तैरायुधैर् ] $S_3$(retraced)Bh (em.?), ॰मुक्तौरायुधैर् $S_1$ **28c** ॰कुर्वाणाः ] **A**Bh, ॰कुर्व्वाणा $S_1$, ॰कुर्वाणो $S_3$ (retraced) **28d** ॰द्रवन्त ] $S_1RA_3A_7$Bh, ॰द्रवन्ति $S_3$ (retraced) • दश ] R**A**, (द) ⏑̲ $S_1$, दशं $S_3^{pc}$(retraced), दिशं $S_3^{ac}$, दिशः Bh (conj.?, in a note Bh suggests दश) **29a** सो ] $S_1S_3^{ac}$R**A**Bh, से $S_3^{pc}$ • वायुर्म॰ ] R**A**Bh, वायुम्म॰ $S_1$, वायु म॰ $S_3$ (retraced) **29b** बभञ्ज ] $S_3$R**A**Bh, मभंज $S_1$ • ॰सत्तमान् ] $S_1S_3^{ac}$Bh, ॰सत्तमाः $S_3^{pc}$ (retraced) **29c** पांसु॰ ] $S_1$ $S_3$(retraced)$A_3A_4$, पांशु॰ Bh (em.?) • ॰वर्षेण ] $S_1S_3^{ac}RA_3A_4$Bh, ॰वर्षेणे $S_3^{pc}$ (retraced) **29d** ॰श्चक्षूंष्येषा॰ ] $A_3^{pc}$Bh, ॰श्चक्षूंष्यैषा॰ $S_1$, ॰श्चक्षुद्ध्यैषा॰ $S_3$ (retraced but द्ध्यै) • ॰मपूरयत् ] $S_1^{pc}$ $S_3$(retraced)**A**Bh, ॰मरयत् $S_1^{ac}$ (unmetrical)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

तथा स्म भयसंत्रस्ता नोत्ससर्जुस्तदा शरान् ।
शस्त्राणि च तथान्यानि पुञ्जशश्चावतस्थिरे ॥ ३० ॥
तस्य तत्कर्म संवीक्ष्य हिरण्याक्षः प्रतापवान् ।
उवाच दानवान्सर्वान्गर्हयन्दितिनन्दनः ॥ ३१ ॥
धिग्वो दैत्या बलं सर्वं धिङ्मायां धिक्पराक्रमम् ।
विसृज्य रणमव्यग्रा यात स्त्रीकर्मसेविनः ॥ ३२ ॥
ये यूयं रणमध्यस्था जीविते सति बालिशाः ।
एकेन वायुना भग्ना धिग्वस्तन्मन्त्रितं पुरा ॥ ३३ ॥
अथवा यन्मया प्रोक्तं यूयं बाला इति क्रमात् ।
तत्तथा नास्ति संदेहो बालैरिव हि वः कृतम् ॥ ३४ ॥
तिष्ठध्वं बालवत्सर्वे रक्षन्तो जीवितं स्वकम् ।
अहमेको विजेष्यामि वायुमेनं प्रपश्यत ॥ ३५ ॥

---

**30a** तथा ] तेन R **30b** ◦स्तदा ] ◦स्तथा R **30c** शस्त्राणि ] अस्त्राणि R **32a** दैत्या ] देत्या R **32c** ◦मव्यग्रा ] ◦मत्युग्रा R **33a** ये ] यद् R **33d** धिग्वस्तन् ] धिगस्तु R (unmetrical) **34b** क्रमात् ] भ्रमात् R **34d** बालैरिव हि वः कृतम् ] वायुनेव बहिस्कृताः R **35a** बालवत्सर्वे ] वातवर्षेण R **35c** अहमे◦ ] अयमे◦ R **35d** प्रपश्यत ] प्रशस्यते R

---

**30ab** ] om. **A** **30c** शस्त्राणि च ] स श{स◦ $A_7$}स्त्राणि **A** **30d** पुंजशश्चा◦ ] मुंचन्वै चा◦{वा◦ $A_4$} $A_3A_4$, मुञ्चण्वैश्चा◦ $A_7$ **31a** तस्य तत् ] तस्मात्त्वं $A_3$, तस्मात्वं $A_4$, तस्मात्तं $A_7$ • संवीक्ष्य ] सद्वीक्ष्य $A_3A_4$, सन्वीक्ष्य $A_7$ **31d** ◦न्गार्हयन् ] ◦न् हर्षयन् **A** **32ab** ] om. **A** **32c** रण◦ ] $A_7$, बल◦ $A_3$, वन◦ $A_4$ • ◦मव्यग्रा ] $A_3$, ◦मध्यग्रा $A_4A_7$ **33a** रण◦ ] $A_7$, बल◦ $A_3$, वन◦ $A_4$ **33d** धिग्वस्तन् ] धिगस्तु $A_3A_4$ (unmetrical), ध्यानस्तु $A_7$ (unmetrical) • पुरा ] $A_3A_4$, पुराः $A_7$ **34c** ◦था नास्ति ] ◦थास्तु न $A_3A_4$, ◦थास्तु $A_7$ (unmetrical) **34d** बालैरिव ] $A_7$, बलैरिव $A_3A_4$ • हि वः कृतम् ] बहिष्कृतं $A_3A_4$, बहिस्कृतं $A_7$ **35a** तिष्ठध्वं ] $A_7$, तिष्टध्वं $A_3A_4$ • बालवत्सर्वे ] बालवत्सर्वं $A_3A_4$, बालञ्च सर्व्वं $A_7$

---

**31**⟨$d^6$–$d^8$⟩ $S_1$ **32**($c^7$–$d^1$) $S_1$ **34**⟨$d^7$–$d^8$⟩ $S_1$ **35**⟨$d^1$⟩ $S_1$

---

**30a** तथा स्म भयसंत्रस्ता ] $S_1^{pc}$, तथा (श्म) भयसन्त्रस्था $S_1^{ac}$, ते तथात्मभयत्रस्ता $S_3$ (retraced from त्म), ततस्ते भयसन्त्रस्ता Bh (conj.) **30b** नोत्ससर्जुस्त◦ ] RBh (em.?), ◦नोत्ससज्ज त◦ $S_1$, नेत्ससर्जुस्त◦ $S_3$ (retraced) **31a** तत्कर्म ] $S_1$RBh, तक्षन्त $S_3^{pc}$, तत्क ⏑ $S_3^{ac}$ • संवीक्ष्य ] $S_1S_3^{ac}$ RBh, संवीक्ष $S_3^{pc}$ (retraced) **31b** हिरण्याक्षः ] $S_3$(retraced)R**A**Bh, हिरण्याक्ष $S_1$ **32a** सर्वं ] $S_3$(retraced)RBh (conj.), सर्व्वें $S_1$ **32b** धिङ्मायां ] R, धिक्मया $S_1$, धिन्मायान् $S_3$ (retraced), धिग्दर्पा Bh (conj.?) • ◦क्पराक्रमम् ] R, ◦क्पराक्रमाः $S_1$Bh, ◦त्पराक्रमः $S_3$ (retraced) **32d** ◦सेविनः ] R**A**, सेवतः $S_1$, ◦सेवितः $S_3$, सेवत Bh (em.?) **33a** ◦मध्यस्था ] $S_1$R**A**Bh, ◦मस्था $S_3$ (unmetrical) **33d** धिग्वस्तन् ] $S_1$Bh, विध्वस्तं $S_3$ (retraced) • पुरा ] $S_3$(retraced)R$A_3A_4$Bh, पुराः $S_1$ **34a** यन्मया ] $S_3$(retraced)R**A**Bh, युम्मया $S_1$ **34b** यूयं ] $S_1$R**A**Bh, यूय $S_3$ (retraced) • इति क्रमात् ] $S_3$(retraced)**A**, रतिक्रमाः $S_1$, रतिक्लमाः Bh (conj.) **34d** वः कृतम् ] conj. Bh (in a note Bh suggests वर्तितं), व – ⏓ $S_1$ (right side of व lost), यः कृता $S_3$ (retraced) **35b** रक्षन्तो ] $S_1S_3^{ac}$ ? R**A**Bh, रक्षध्वो $S_3^{pc}$ **35c** अहमे◦ ] $S_1^{pc}S_3$**A**Bh, अ(ज्ञा)मे◦ $S_1^{ac}$ **35d** प्रपश्यत ] $S_1$**A**Bh, प्रशस्यत $S_3$ (retraced)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

ततः स पर्वतो भूत्वा दितिपुत्रः प्रतापवान्।
समन्ताद्वायुवेगं तं समवारयदव्यथः॥ ३६॥
वायुं निवारितं ज्ञात्वा पर्वतेन तदा विभुम्।
अन्धको बाहुपाशेन अवप्रुत्याबबन्ध तम्॥ ३७॥
स बद्धो बाहुपाशेन जगदायुः प्रतापवान्।
संप्रगृह्यान्धकं शीघ्रमुत्पपात विहायसा॥ ३८॥
तस्योत्पतितमात्रस्य प्रगृह्यान्धकदानवम्।
राहुर्गदां महारौद्रीं क्षिप्रं मूर्ध्नन्यपातयत्॥ ३९॥
अभ्येत्य पादयोश्चैव विप्रचित्तिर्महाबलः।
जग्राह सुमहाग्राहो मत्सानिव महार्णवे॥ ४०॥

---

**36a** ततः स ] स ततः R **36d** समवारयद॰ ] स च चाकपद॰ R **37d–38a** ] om. R **38c** संप्र॰ ] स प्र॰ R **39d** मूर्ध्नन्य॰ ] मूर्द्धन्य॰ R **40a** ॰श्चैव ] ॰श्चैनं R **40c** जग्राह ] जगाम R **40cd** ॰ग्राहो मत्सानिव महा॰ ] ॰वीरो महाग्राह इवा॰ R

---

**36a** स ] $A_3A_4$, om. $A_7$ (unmetrical) **36d–37b** ] ज्ञात्वा पर्व्वतदा विभुं **A** **37c** बाहु॰ ] वायु॰ **A** **37d** ॰प्रुत्या॰ ] ॰प्लुत्या॰ **A** **38a** स बद्धो बाहु॰ ] सबन्धो बहु॰ **A** **38b** जगदायुः ] जगद्वायुः **A** **38cd** ॰घ्रमुत्पपात ] $A_3$, ॰घ्रं तत् पपात $A_4$, ॰घ्रं उ(प्री)पात $A_7$ (प्री possibly cancelled) **38d** विहायसा ] $A_3A_4$, विहायसाः $A_7$ **39b** ॰दानवम् ] ॰दानवः **A** **39c** राहुर्गदां ] वायोद्गदां $A_3$, वायो गदां $A_4$, रथोद्गदां $A_7$ • ॰रौद्रीं ] $A_4A_7$, ॰रौन्द्रीं $A_3$ **39d** मूर्ध्नन्य॰ ] मूद्धन्र्यव॰ $A_3$, मूद्धन्र्य च $A_4$, मूर्द्धप॰ $A_7$ **40ab** ] om. **A** **40c** जग्राह ] जगाम $A_3A_4$, जघान $A_7$ **40cd** ॰ग्राहो मत्सानिव महार्णवे ] ॰रावो महाप्रा{॰प्रो॰ $A_7$}ह इवार्ण्णवे{इवांतरे $A_3A_4$} **A**

---

**36**$(a^6–a^7, d^7)\langle d^8\rightarrow\rangle$ $S_1$ **37**$\langle\leftarrow a^1\rangle(a^2–a^5)$ $S_1$ **39**$(c^7–c^8, d^2–d^8)$ $S_1$ **40**$\langle b^7\rangle(b^8–c^5)$ $S_3$

---

**36a** स पर्वतो ] $S_1A_3A_4$Bh, सर्पतो $S_3$ (unmetrical) **36b** ॰पुत्रः ] $S_3$R**A**Bh, ॰पुत्र $S_1$ **36c** ॰वेगं तं ] $S_3$(retraced)R**A**Bh, ॰वेगेन $S_1$ **36d** ॰दव्यथः ] $S_3$(retraced)R, ॰द(व्य)⏓ $S_1$, ॰दव्ययः Bh (conj., in a note Bh suggests ॰दव्यथः) **37a** वायुं निवारितं ] $S_3$R, ⏓⏓(निव्वारि)त $S_1$ (upper parts lost, second akṣara has vowel उ), – – ि– त्वानिलं Bh (conj.?) **37b** पर्वतेन ] $S_1$RBh, पर्वशत $S_3^{pc}$ (retraced), पर्व⏓⏓ $S_3^{ac}$ • तदा विभुम् ] $S_3^{pc}$(retraced)R**A**, निवारितं $S_1$, ˘दा विभुं $S_3^{ac}$, निवारितम् Bh **37d** ॰प्रुत्या॰ ] $S_3^{ac}$?, ॰प्लुत्या॰ $S_1S_3^{pc}$(retraced)Bh • ॰बन्ध तम् ] **A**Bh, ॰बन्धतः $S_1$, ॰बन्ध त $S_3$ (retraced) **38a** स बद्धो ] $S_1^{pc}$Bh, संबद्धो $S_1^{ac}$, स बध्वो $S_3$ (retraced) **38b** जगदायुः ] R, ज⟨(द)⟩+ग+दाय $S_1$, जगाम+वा+यु $S_3$ (unmetrical, retraced), तदा वायुः Bh (conj.) • प्रताप॰ ] $S_3$(retraced)R**A**Bh, पताप॰ $S_1^{pc}$, (पु)ताप॰ $S_1^{ac}$ **38c** ॰ह्यान्धकं ] $S_3$(retraced)R**A**Bh, ॰ह्यन्धकं $S_1^{pc}$, ॰ह्यन्दकं $S_1^{ac}$ **38cd** ॰घ्रमुत्पपात ] $S_3$(retraced)R$A_3$Bh, ॰घ्रं मुपपात $S_1$ **38d** विहायसा ] $S_1S_3$(retraced)R$A_3A_4$, विहायमा Bh (typo) **39a** ॰त्पतित॰ ] $S_1^{pc}S_3$(retraced)R**A**Bh, ॰त्पतति॰ $S_1^{ac}$ **39b** ॰ह्यान्धक॰ ] $S_1^{pc}S_3$(retraced)R**A**Bh, ॰ह्यन्धक॰ $S_1^{ac}$ • ॰दानवम् ] $S_1S_3^{ac}$RBh, ॰बालवं $S_3^{pc}$ **39c** राहुर्गदां ] $S_3$(retraced)RBh, राहुगदा $S_1$ (anusvāra possibly lost) • ॰रौद्रीं ] $S_3^{pc}$R$A_4A_7$, (॰रोद्रा)॰ $S_1$ (upper parts lost), ॰रौद्रां $S_3^{ac}$Bh (em.?) **39d** मूर्ध्नन्य॰ ] $S_3$, ⏓(ध्न) ˘ $S_1$ (upper parts lost, first akṣara has vowel ऊ and last one subscript य्), मूर्ध्नि न्य॰ Bh (em.?) **40b** विप्रचित्तिर् ] $S_1$RBh, विप्रचित्ति॰ $S_3$ (retraced) **40cd** ॰ग्राहो मत्सानिव महा॰ ] $S_1$, ॰रावो{(णा)⏓ $S_3^{ac}$} महाग्राह इवा॰ $S_3$ (tops lost of रावो), ॰ग्राहो मत्स्यानिव महा॰ Bh (em.)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

स तेन सुप्रहारेण विह्वलः प्राणिगोचरः।
अन्धकेनाभिसंयुक्तो भ्रामितो विप्रचित्तिना॥ ४१॥
स भ्राम्यमाणो विबभौ स्रस्तहारस्रगम्बरः।
अलातमिव संदीप्तं निशायां मुनिसत्तम॥ ४२॥
भ्राम्यमाणं समालक्ष्य पुनर्देवाः सवासवाः।
वेगं चक्रुर्महावेगा गृह्ण गृह्णेतिवादिनः॥ ४३॥
विप्रचित्तिस्तु तान्दैत्यः संरब्धानुद्यतायुधान्।
आलक्ष्य सुबहून्संख्ये गर्जमानान्पयोदवत्॥ ४४॥
अभीक्ष्णं भीमसंह्रादं वायुं दानवयूथपः।
चिक्षेप शक्रमुद्दिश्य गिरौ वज्रं यथैव सः॥ ४५॥
स चापि तेन विक्षिप्तो लब्धसंज्ञो महाबलः।
विहाय वेगं देवेन्द्रमुपतस्थे कृताञ्जलिः॥ ४६॥
ततो वायुश्च देवाश्च सर्व एव सहानुगाः।
अभ्यद्रवन्त दैत्येन्द्रान्प्रगृहीतवरायुधाः॥ ४७॥

---

**41b** प्राणि॰ ] प्राण॰ R **41c** ॰नाभि॰ ] ॰नापि R **42b** ॰हारस्रग॰ ] ॰हारो⊔ग॰ R **42d** ॰सत्तम ] ॰सत्तमः R **43a** भ्राम्यमाणं ] भ्राम्यमानं R **44b** संरब्धानुद्यतायुधान् ] शरांश्चाभ्युद्यतायुतान् R **44c** आलक्ष्य सुबहून् ] समालक्ष्य सकृत् R **44d** गर्जमानान् ] गर्ज्जमानः R **46c** विहाय ] विधाय R **47cd** दैत्येन्द्रान्प्रगृहीत॰ ] दैत्येन्द्रं प्रगृह्य च R

---

**41cd** ] om. **A** **42a** स भ्राम्यमाणो ] संभ्राम्यमाणो{॰नो $A_3A_4$} **A** **42b** ॰हारस्रग॰ ] ॰द्वारसृग॰ **A** **42cd** ] om. **A** **43a** भ्राम्यमाणं ] $A_3A_4$, भ्राम्यमानां $A_7$ **43b** ॰र्देवाः ] $A_3A_7$, ॰र्देवा $A_4$ **44b** ॰नुद्यतायुधान् ] ॰न{॰ल॰ $A_7$}भ्यताडयत् **A** **44c** आलक्ष्य ] आलम्ब्य **A** **44d** गर्जमानान् ] गर्जमानः **A** **45ab** ] om. **A** **45c** शक्र॰ ] $A_3A_4$, शत्रु॰ $A_7$ **45d** यथैव सः ] यथा तथा **A** **47b** सहा॰ ] $A_3A_4$, महा॰ $A_7$ **47cd** ] om. **A**

---

**43**($d^2$) $S_3$

---

**41b** प्राणि॰ ] $S_1$**A**Bh, प्राण॰ $S_3$ **41c** अन्धकेना॰ ] $S_3$R, स्कन्धे केशा॰ $S_1^{pc}$Bh, स्कन्दे केशा॰ $S_1^{ac}$ **42a** भ्राम्यमाणो ] R$A_7$Bh (em.?), भ्राम्यमानो $S_1S_3$ • विबभौ ] R**A**Bh, विमभौ $S_1$, विभवौ $S_3$ **42c** संदीप्तं ] $S_1$RBh, संलातं $S_3$ **42d** ॰सत्तम ] em. Bh (silently), ॰सत्तमः $S_1S_3$ **43a** भ्राम्यमाणं ] $S_1A_3A_4$Bh, भ्राम्यमानां $S_3$ **43b** पुनर्देवाः ] R$A_3A_7$Bh, पुन द्देवा $S_1$, पुन देवाः $S_3$ • ॰वासवाः ] $S_3$R**A**Bh, ॰वासवा $S_1$ **43c** ॰गं चक्रुर् ] R**A**Bh, ॰गञ्चक्रूर् $S_1$, ॰गं चक्रु $S_3$ **43d** गृह्ण गृह्णे॰ ] $S_3$R**A**, गृह्ण शृह्णे॰ $S_1$, गृहण गृह्णे॰ Bh (typo, unmetrical) • ॰वादिनः ] $S_1$R**A**Bh, (॰क)दिनः $S_3$ (unmetrical) **44a** तान्दैत्यः ] R**A**Bh, तान्दैत्य $S_1$, तां दैत्य $S_3$ **44b** संरब्धा॰ ] **A**Bh, संरब्ध॰ $S_1$ (unmetrical), सरंब्धा॰ $S_3$ **44c** ॰बहून्संख्ये ] **A**Bh, ॰बहूं संखे $S_1$, ॰बहू बन्धू $S_3$ **44d** गर्जमानान् ] em., गर्ज्जमाना $S_1$, गजमना $S_3$ (unmetrical), गर्जमानः Bh **45a** ॰संह्रादं ] $S_3$RBh (em.?), ॰संह्लादं $S_1$ **45c** शक्र॰ ] $S_1^{pc}S_3$R$A_3A_4$Bh, श्रक्र॰ $S_1^{ac}$ • ॰मुद्दिश्य ] $S_1$R**A**Bh, ॰मुदिश्य $S_3$ (unmetrical) **45d** गिरौ ] $S_3$R**A**Bh, गिरो $S_1$ **46a** विक्षिप्तो ] $S_1$R**A**Bh, विक्षिप्ते $S_3$ **46c** विहाय ] **A**, विधाय $S_1$Bh, निधाय $S_3$ **47b** सहा॰ ] $S_1$R$A_3A_4$Bh, महा॰ $S_3$ **47c** दैत्येन्द्रान् ] $S_1$Bh, देवेन्द्रो $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

तेषां तेषां च संग्रामः सुघोरः समपद्यत।
सिंहानामिव दृप्तानां विजने शरभैः सह॥ ४८॥
तत्र केचिद्विनिहताः सुप्रहारेण मूर्छिताः।
साधु साध्विति भाषन्तः प्राणानूर्ध्वं वितत्यजुः॥ ४९॥
अपरे देवदैत्येन्द्राः पदान्मुक्ता महाबलाः।
परेणाभ्याहतं शूरं संरक्षन्तः स्वपुत्रवत्॥ ५०॥
केचिद्धत्वापि सुबहून्देवदानवसत्तमाः।
अविक्षताः शितैः शस्त्रैरात्मानं गर्हयन्त्युत॥ ५१॥
अशस्त्रं केचिदभ्येत्य देवदैत्या महाबलाः।
धर्मयुद्धमभीप्सन्तस्त्यक्त्वा शस्त्राण्ययोधयन्॥ ५२॥
बहवस्तत्र दैत्येन्द्रा युयुधुर्भीमविक्रमाः।
देवाश्च नाहता ये वै नाभिघ्नन्ति कदाचन॥ ५३॥

---

**49d** ॰णानूर्ध्वं ] ॰णांस्तूर्णं R **50b** पदान्मुक्ता ] मदयुक्ता R **50c** परेणा॰ ] शरेणा॰ R **50cd** ॰रं संरक्षन्तः स्वपुत्रवत् ] ॰रम{॰रं म्व॰ $R^{ac}$}क्षयन्त सुयुद्धवत् R **51c** अविक्षताः ] आविक्षताः R **51d** गर्हय॰ ] गर्ज्जय॰ R **52d** शस्त्राण्ययोधयन् ] पत्रान्न्यवाधयन् R **53c** नाहता ] आहवे R **53d** नाभि॰ ] न तान् R

---

**48b** ॰पद्यत ] $A_3$, ॰पद्यतः $A_4A_7$ **48c** सिंहाना॰ ] $A_4A_7$, सिंहना॰ $A_3$ **48cd** दृप्तानां विजने ] तृप्तानां{॰णां $A_7$} विजये **A** **48d** शरभैः ] $A_4A_7$, सरभैः $A_3$ **49c** भाषन्तः ] $A_4A_7$, भाषतः $A_3$ **49d** ॰नूर्ध्वं ] $A_3$, ॰नूर्द्धं $A_4A_7$ **50b** पदान्मुक्ता ] मदयुक्ता **A** **50c** परेणाभ्या॰ ] पादपाद्या॰ **A** **50d** संरक्षन्तः ] संरक्षन्त **A** • स्व॰ ] $A_3A_4$, सु॰ $A_7$ **51a** ॰द्धत्वापि ] ॰द्धूक्कापि $A_3A_4$, ॰द्धुद्धापि $A_7$ **51c** ॰क्षताः शितैः शस्त्रै॰ ] ॰क्षिप्ताः शितैर्बाणै॰ **A** **51d** गर्हयन्त्युत ] $A_3A_7$, गर्हयेत्युत $A_4$ **52a** अशस्त्रं केचिद॰ ] अस्त्रं केचित्तदा॰ **A** **52c** ॰युद्ध॰ ] ॰युक्त॰ **A** **52d** ॰योधयन् ] $A_3A_4$, ॰योधयत् $A_7$ **53cd** ] om. **A**

---

**48**($c^2$) $S_3$

---

**48a** संग्रामः ] $S_1$**RA**Bh, सग्रामः $S_3$ **48b** सुघोरः ] **RA**Bh, सुघोर $S_1S_3$ • ॰पद्यत ] $S_3$R$A_3$Bh, ॰पद्यतः $S_1$ **48c** सिंहाना॰ ] $S_1$R$A_4A_7$Bh, सिङ्हना⟨द⟩॰ $S_3$ **48d** शरभैः ] $S_1$R$A_4A_7$Bh, शरभै $S_3$ **49a** ॰निहताः ] **RA**Bh, ॰निहता $S_1S_3$ **49b** मूर्छिताः ] **RA**Bh, मूर्च्चिताः $S_1$, मूर्च्छिता $S_3$ **49c** भाषन्तः ] $S_1^{pc}$R$A_4A_7$Bh, भाशन्तः $S_1^{ac}$, भाषन्तं $S_3$ **49d** ॰णानूर्ध्वं ] $S_3A_3$Bh, ॰णामूर्द्ध्वं $S_1$ • ॰तत्यजुः ] $S_1$**RA**Bh, ॰तत्यजः $S_3$ **50a** देव॰ ] $S_1S_3$**RA**, दनु॰ Bh (conj.?) **50b** पदान्मुक्ता ] conj., यदामुक्ता $S_1$, पदामुक्ता $S_3$, मुदा युक्ता Bh (conj.) **50c** परेणाभ्या॰ ] $S_1$Bh, प्रहारेणा॰ $S_3$ **50d** संरक्षन्तः ] em., सरक्षन्तः $S_1$, सरक्षन्त $S_3$, समरक्षन् Bh (conj.) • स्व॰ ] $S_3A_3A_4$, सु॰ $S_1$Bh **51c** ॰विक्षताः ] $S_3$RBh (em.?), ॰विक्षता $S_1$ **51d** ॰न्त्युत ] R$A_3A_7$Bh, ॰न्त्युतः $S_1S_3$ **52b** महाबलाः ] $S_1$**RA**Bh, महाबलः $S_3$ **52cd** ॰न्तस्त्यक्त्वा ] **RA**Bh, ॰न्तः त्यक्तो $S_1$, ॰न्त त्यक्त्व $S_3$ **52d** ॰योधयन् ] $A_3A_4$Bh, ॰योधयत् $S_1S_3$ **53b** युयुधुर् ] **RA**Bh, युयुर्धु $S_1$ (unmetrical), युयुधु $S_3$ (unmetrical) **53c** ये वै ] $S_1$RBh, यैव $S_3$ **53d** कदाचन ] RBh (em.?), कदाचनः $S_1S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

पदातयस्तत्र सर्वे योधयन्ति पदातिनः।
सादिनः सादिभिः सार्धं रथिनो रथिभिः सह।
गजिनो गजिभिश्चैव तथा युद्धमवर्तत॥ ५४॥
एवं तेषां स संग्रामो देवानां दानवैः सह।
अवर्तत शतान्यष्टौ वर्षाणां तु महाभयः॥ ५५॥
अथ दैत्यो महामायो गजेनाम्बुदवर्चसा।
तोमरं सुमहद्बिभ्रद्युगान्तानलवर्चसम्॥ ५६॥
कोकिलाञ्जनमेघाभो विश्रुतो यो विरोचनः।
सो ऽभ्यद्रवत्तदा देवानीतिः सस्यानिवोत्थितान्॥ ५७॥
स गजेन प्रभिन्नेन मुखाडम्बरघोषिणा।
अभिदुद्राव देवेन्द्रं तिष्ठ तिष्ठेति चाब्रवीत्॥ ५८॥
तस्यापतत एवाथ भगवान्पाकशासनः।
जत्रुदेशे शरं घोरं निचखान ररास च॥ ५९॥

---

**54a** °स्तत्र ] °स्ततः R **55a** एवं तेषां स ] एवञ्च तेषां R **55c** अवर्तत ] अवर्त्तन्त R **55d** महाभयः ] भयावहम् R **57cd** ] om. R **58d** चाब्रवीत् ] चाब्रवी R **59c** जत्रु° ] जङ्घ° R

---

**54f** °वर्तत ] $A_3$, °वर्त्ततः $A_4A_7$ **55a** स ] च **A** **55b** °नां दानवैः ] $A_3A_4$, °णां दानवै $A_7$ **55cd** ] om. **A** **56cd** °द्बिभ्रद्यु° ] $A_3$, °बिभ्र यु° $A_7$, °बिभ्र षु° $A_4$ **56d** °गान्तानल° ] °गान्तादित्य° **A** **57d** सस्यानि° ] $A_3A_4$, शस्यानि° $A_7$ • °वोत्थितान् ] °वोत्थिताः **A** **58a** स गजेन प्र° ] गजेन प्रति° **A** **58b** मुखाडम्बरघोषिणा ] मुखान्मदस्रवेन च $A_3A_4$, न्मदश्रवेन च $A_7$ (unmetrical) **58d** तिष्ठ तिष्ठेति ] $A_3A_7$, तिष्ट तिष्टेति $A_4$ **59c** शरं घोरं ] शरान् घोरान् **A** **59d** निचखान ] $A_3$, विचखान $A_4A_7$ • ररास ] $A_3A_4$, रराम $A_7$

---

**54**($e^4$–$e^5$) $S_1$

---

**54ab** ] om. $S_1$ **54b** पदातिनः ] $S_3$R**A**, पदातिभिः Bh (conj.) **54c** °भिः सार्द्धं ] $S_1$R**A**Bh, °भि सार्द्ध $S_3$ (unmetrical) **54e** गजिनो ] $S_1$R**A**Bh, गजिना $S_3$ **54f** °वर्तत ] $S_3RA_3$Bh, °वर्त्ततः $S_1$ **55a** एवं ] $S_3$R**A**Bh, एव $S_1$ • स ] $S_3$, हि $S_1$Bh **55b** °नां दानवैः ] $S_1RA_3A_4$Bh, °नान्दानवै $S_3$ **55c** अवर्तत ] em., आवर्त्तत $S_1$, अवत्तत $S_3$, आवर्तत Bh **55d** वर्षाणां तु ] $S_1S_3$R, वर्षाणि सु° Bh (conj.?) • महाभयः ] $S_1^{pc}S_3$Bh, ⏑ –भयः $S_1^{ac}$ **56b** °नाम्बुद° ] $S_1^{pc}S_3$ R**A**Bh, °नांबु(ज°) $S_1^{ac}$ • °वर्चसा ] $S_3$R**A**Bh, वर्च्चसाः $S_1$ **56c** तोमरं ] $S_3$R**A**Bh, तोमर $S_1$ (unmetrical) **56cd** °द्बिभ्रद्यु° ] $S_1RA_3$Bh, °द्बिभ्र यु° $S_3$ **56d** °वर्चसम् ] $S_1$R**A**Bh, °वर्चसां $S_3$ **57a** °लाञ्जन° ] $S_1$R**A**Bh, °लाजन° $S_3$ • °मेघाभो ] $S_1^{pc}S_3$R**A**Bh, °मेघातो $S_1^{ac}$ **57b** विश्रुतो ] $S_3$R**A**, विद्रुतो $S_1$Bh • विरोचनः ] $S_1S_3^{pc}$R**A**Bh, विरोचनं $S_3^{ac}$ **57d** °नीतिः सस्यानि° ] $A_3A_4$, °नातिसव्यानि° $S_1$Bh, °नीति सस्यानि° $S_3$ • °वोत्थितान् ] em. Bh (silently), °वोस्थितां $S_1$, °वोच्छ्रितां $S_3$ **58b** °घोषिणा ] $S_3$RBh (em.?), °घोषिणाः $S_1$ **58d** तिष्ठ ] $S_1RA_3A_7$Bh, तिष्ट $S_3$ **59c** जत्रुदेशे ] **A**Bh, जत्रुदेश $S_1$, शक्रदेशे $S_3$ • शरं घोरं ] $S_3$RBh (conj.?), चरन्घोर $S_1$ **59d** ररास ] $S_1^{pc}S_3RA_3A_4$Bh, र(वा)स $S_1^{ac}$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

अनुभूय प्रहारं तं स दैत्यो भीमविक्रमः ।
तस्यास्यतस्तोमरेण बिभेद करमुद्धतम् ॥ ६० ॥
अथास्य तोमरोद्भिन्नाद्धस्ताद्धेमविभूषितम् ।
पपात तद्धनुर्दिव्यं महाशनिसमस्वनम् ॥ ६१ ॥
ततो ऽस्य भूयो दैत्येन्द्रो व्याकुलस्य तदा गजम् ।
तोमरेण बिभेदाशु कुम्भदेशे महाबलः ॥ ६२ ॥
स भिन्नस्तेन दैत्येन वने मत्त इव द्विपः ।
अनङ्कुशः सन्नमृद्नात्स्वं बलं ह्यनिवारितः ॥ ६३ ॥
ते तथा वध्यमानास्तु आदित्या दैत्यदानवैः ।
भयार्दिता दिशः सर्वा व्यपालयन्त सर्वशः ॥ ६४ ॥
ततः शङ्खाश्च भेर्यश्च वाद्यानि विविधान्यपि ।
सिंहनादांश्च संचक्रुर्दैत्यदानवसंमताः ॥ ६५ ॥

---

**60a** ॰हारं तं ] ॰हारन्तु R **60d** ॰मुद्धतम् ] ॰मुद्यतः R **61b** ॰भूषितम् ] ॰भूषितात् R **61c** पपात ] यथा च R **63cd** सन्नमृद्नात्स्वं ] समगत् स्व॰ R (unmetrical) **64a** ॰स्तु ] ॰श्च R **64b** ॰दानवैः ] ॰दानवाः R **64c** सर्वा ] सर्व्वे R **64d** व्यपलायन्त ] प्रपलायन्त R **65d** ॰संमताः ] ॰सत्तमाः R

---

**60d** ॰मुद्धतम् ] $A_7^{ac}$, ॰मुद्धूतं $A_3A_4A_7^{pc}$ **61ab** अथास्य तोमरोद्भिन्नाद्ध॰ ] यथास्य तोमरात् भिन्ना ह॰ **A** **61b** ॰भूषितम् ] ॰भूषितां $A_3A_7$, ॰भूषिता $A_4$ **61c** तद्धनु॰ ] $A_3A_4$, तन्धनु॰ $A_7$ **61d** महा॰ ] यथा॰ **A** • ॰समस्वनम् ] ॰समुल्वणं $A_3$, ॰समुज्ज्वलं $A_4$, ॰समण्वनं $A_7$ **62b** गजम् ] $A_3A_4$, गज $A_7$ **63cd** ] om. **A** **64c** सर्वा ] सर्वे **A** **65a** भेर्यश्च ] $A_3$, भेरीश्च $A_4$, भेरी च $A_7$ **65b** वाद्यानि ] $A_3A_4$, वाह्यानि $A_7$ • ॰न्यपि ] ॰नि च **A** **65c** ॰नादांश्च ] $A_7$, ॰नादं च $A_3A_4$ • संचक्रुर् ] $A_3A_4$, सञ्चक्रु $A_7$ **65d** ॰संमताः ] $A_3A_4$, ॰सन्मताः $A_7$

---

**63**($c^8$) $S_1$

---

**60c** ॰स्यतस्तोमरेण ] $S_3$R**A**, ॰स्य तोमरेणाच $S_1$, ॰स्य तोमरेणाथ Bh (conj.?) **60d** ॰मुद्धतम् ] $S_1S_3A_7^{ac}$, ॰मुन्नतम् Bh (conj.) **61ab** ॰रोद्भिन्नाद्धस्ताद्धे॰ ] RBh (em.?), ॰रोभिन्नाद्धस्ता हे॰ $S_1$, ॰रोभिन्ना हस्ताद्धे॰ $S_3$ **61b** ॰भूषितम् ] $S_3$Bh (em.?, in a note Bh suggests ॰भूषितात्), ॰भूषितां $S_1$ **61c** तद्धनुर् ] $S_1RA_3A_4$Bh, तद्धनु $S_3$ (unmetrical) **61d** ॰स्वनम् ] $S_3$R, ॰प्रभं $S_1$, ॰प्रभम् Bh **62b** गजम् ] $S_1^{pc}S_3RA_3A_4$Bh, गजः $S_1^{ac}$ **62d** कुम्भ॰ ] $S_1S_3$R**A**, कुभ्भ॰ Bh (typo) **63c** अनङ्कुशः ] $S_1^{pc}$RBh, अनंकुश $S_1^{ac}$, अनकुशः $S_3$ (unmetrical) **63cd** सन्नमृद्नात्स्वं ] conj., स न मृ(द्धा) स्वम् $S_1^{pc}$ (unmetrical), शरमृ(द्ना) स्वम् $S_1^{ac}$ (unmetrical), समं मृद्ना स्व॰ $S_3$, शनैर्घृ– स्वं Bh (conj.?) **63d** बलं ] $S_1$RBh, ॰बल्यं $S_3$ • After this Bh conjectures loss of two pādas. **64a** वध्यमाना॰ ] $S_1S_3$R**A**, बध्यमाना॰ Bh **64b** आदित्या ] $S_1$R**A**Bh, आदित्यो $S_3$ **64c** दिशः ] $S_1$R**A**Bh, दिश $S_3$ (unmetrical) • सर्वा ] conj., सर्व्वे $S_1$, सर्वे $S_3$, सर्वाः Bh (conj.) **64d** व्यपलायन्त ] $S_3$**A**, व्यपलायन्ति $S_1$, पलायन्ते स्म Bh (conj.) **65a** भेर्यश्च ] $S_3RA_3$Bh, भैर्याश्च $S_1$ **65b** वाद्यानि ] $S_1S_3^{pc}RA_3A_4$Bh, वाद्यावि॰ $S_3^{ac}$ • After this Bh conjectures loss of two pādas. **65cd** संचक्रुर्दै॰ ] $RA_3A_4$Bh, संक्रुद्धै द्दै॰ $S_1$, संचक्रु दै॰ $S_3$ **65d** ॰संमताः ] $S_3A_3A_4$Bh, ॰सम्मता $S_1$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

तच्छिन्नभिन्नप्रविदारणातुरं गजेन दैत्यैश्च पुनर्विलोडितम् ।
बलं महद्दैवतपालितं बभौ यथार्णवो मन्दरमन्थविक्षतः ॥ ६६ ॥

इति स्कन्दपुराण एकोननवतितमो ऽध्यायः ॥ ८९ ॥

---

**66b** गजेन ] गजेन्द्र° R **Col.** इति स्कन्दपुराणे रेवाखण्डे ऽध्यायः R

---

**66a** तच्छिन्न° ] $A_4A_7$, सच्छिन्न° $A_3$ • °दारणातुरं ] °दारितान्तरं **A** **66b** पुनर्विलोडितम् ] विलोकितं **A** (unmetrical) **66cd** ] बलं महत्तत्तदैव तद्गु{तं ब° $A_4$, त्तद्ब° $A_7$}भौ यथान्तरो मन्ववो वीक्ष{विक्षि° $A_7$}तः **A** (unmetrical) **Col.** इति स्कन्दपुराणे एकाशीतिसाहस्रयां संहितायां{इति स्कंद° $A_4$}मम्बिकाखण्डे ई{इ° $A_3A_7$ ? }तिपराजयो नामाध्यायः **A**±

---

**66**(d[11]) $S_1$

---

**66a** तच्छिन्न° ] $S_1^{pc}S_3RA_4A_7Bh$, तच्छि(न्द°) $S_1^{ac}$ • °भिन्न° ] R**A**Bh, °भिन्द° $S_1$, °भिन° $S_3$ (unmetrical) • °प्रविदारणातुरं ] $S_1^{pc}R$, °प्रदरणातुरङ् $S_1^{ac}$ (unmetrical), °प्रविदारणातुर $S_3$, °प्रविदारितान्तरं Bh **66b** पुनर् ] $S_1RBh$, पुन $S_3$ (unmetrical) • °लोडितम् ] $S_3RBh$ (em.), °लोलितं $S_1$ **66c** बलं महद् ] $S_1RBh$, बल मह $S_3$ (unmetrical) **66d** °विक्षतः ] RBh (em.?), °वि(क्ष)तेति $S_1$ (इति part of col.), °वीक्षत $S_3$ **Col.** ⊙॥ स्कन्दपुराणे युद्धे आद्धायः १४५ (in letter numerals)॥ ⊙ $S_1$, ⊙॥ स्कन्दपुराणे नामाध्यायः ८९ (in letter numerals)॥ ⊙ $S_3$, इति स्कन्दपुराणे युद्धे एकोननवतितमोध्यायः Bh

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

# नवतितमो ऽध्यायः।

सनत्कुमार उवाच।
तदेव सैन्यं संदृश्य दैत्यदानवयूथपैः।
वध्यमानं भृशं व्यास व्याधैरिव मृगान्वने॥ १॥
तिमिरारिर्महातेजाः सोमः प्रहरतां वरः।
सितवर्मा सुशीतार्चिः स्वयं पवनसारथिः॥ २॥
तौ बद्धकवचौ सम्यक्शरासनधरावुभौ।
बद्धगोधाङ्गुलित्रौ च तथा बद्धेषुधी च तौ॥ ३॥
सखड्गौ च सघण्टौ च सपताकौ गजाविव।
उभौ वीरौ महावीर्यौ योद्धुं दैत्यान्व्यवस्थितौ॥ ४॥
सोमस्तु दशभिस्तीक्ष्णैः सायकैर्मर्मभेदिभिः।
विव्याध हृदये दैत्यं हिरण्याक्षं महासुरम्॥ ५॥

---

**1a** तदेव ] तं देव॰ R **1d** व्याधैरिव मृगान् ] व्याधेनेव मृगम् R **2c** सुशीतार्चिः ] महाबाहुः R **3d** च तौ ] वरौ R **4a** सखड्गौ च स॰ ] सपक्षौ रस॰ R **4b** गजाविव ] $R^{pc}$, महागजौ $R^{ac}$ **4d** योद्धुं दैत्यान्व्यव॰ ] सार्द्धं दैत्यैरव॰ R **5d** महासुरम् ] महाबलम् R

---

**1a–2d** ] om. $A_7$ **1d** व्याधैरिव ] व्याधेनेव $A_4$, व्याधेनैव $A_3$ **2b** सोमः ] $A_3$, सोम $A_4$ **2c** सितवर्मा सु॰ ] शितवर्मायु॰ $A_3A_4$ • ॰शीतार्चिः ] ॰शितार्च्चि $A_3$, ॰शांताच्चि $A_4$ **4a** सखड्गौ ] $A_4$, सखड्गै $A_3$, सखद्गौ $A_7$ • सघण्टौ च ] सुसन्नद्धौ $A_3A_4$, सुसन्धद्धौ $A_7$ **4d** योद्धुं दैत्यान्व्यव॰ ] योद्धु-निष्ठौ{॰ष्टौ $A_4$} वन॰{रण॰ $A_7$} **A** **5b** सायकै॰ ] $A_3A_4$, शायकै॰ $A_7$

---

Manuscripts available for this chapter: $S_1$ 8.24 (f. 143$^v$), 8.23a (f. 144$^r$) and 8.22b (f. 144$^v$); $S_3$ f. 145$^r$–146$^r$; R f. 164$^r$–164$^v$; $A_3$ f. 96$^r$–97$^r$; $A_4$ f. 139$^r$–139$^v$; $A_7$ f. 135$^v$–136$^v$.
**2**⟨$d^1$⟩($d^2$–$d^6$) $S_1$ **5**($a^7$–$b^4$)⟨$b^5$–$b^6$⟩($b^7$, $c^1$–$c^8$, $d^4$–$d^6$) $S_1$, ($d^7$–$d^8$) $S_3$

---

**1a** तदेव ] $S_1S_3A_3A_4$, तद्देव॰ Bh (conj.?) • सैन्यं सं॰ ] $S_1RA_3A_4$Bh, सैन्य स $S_3$ (unmetrical) **1b** ॰दानव॰ ] $S_1^{pc}S_3RA_3A_4$Bh, ॰दान(य॰) $S_1^{ac}$ • ॰यूथपैः ] $RA_3A_4$Bh, ॰यूथपाः $S_1S_3$ **1c** भृशं ] $S_3RA_3A_4$Bh, भृषं $S_1$ **1d** व्याधैरि॰ ] $S_1S_3^{pc}$, (ध्या)धैरि॰ $S_3^{ac}$, व्याघैरि॰ Bh (typo) • मृगान् ] $S_1A_3A_4$Bh, मृगा $S_3$ **2a** ॰रिर्महातेजाः ] $RA_3A_4$Bh, ॰रि महातेजो $S_1$, ॰रि महातेजा $S_3$ **2b** सोमः ] $S_3RA_3$Bh, सोम $S_1$ **2c** सितवर्मा ] $S_3$R, तिग्मवर्म्मा $S_1$, तिग्मवर्ष्मा Bh (conj.) • ॰शीतार्चिः ] $S_1^{pc}S_3$Bh, ॰शीतार्च्चीं $S_1^{ac}$ **2d** ॰सारथिः ] $S_3RA_3A_4$Bh, (॰सा)रथि $S_1$ **3ab** सम्यक्शरा॰ ] R**A**Bh, सम्यङ्करा॰ $S_1$, सस्य $S_3$ (unmetrical) **4a** सखड्गौ च स॰ ] $S_3$Bh (em.?), सखद्गौ स च $S_1$ • ॰घण्टौ ] $S_1$RBh, ॰घण्ठो $S_3$ **4b** गजाविव ] $S_3R^{pc}$**A**Bh, गजा{॰दा॰ $S_1^{ac}$}विवत् $S_1$ **4c** ॰वीर्यौ ] $S_3$R**A**Bh, ॰वीर्य्यौ $S_1$ **4d** ॰द्धुं दैत्यान् ] em. Bh (silently), ॰द्धुन्दैत्या $S_1$, ॰द्धुं दैत्या $S_3$ **5a** दश॰ ] $S_1$R**A**Bh, दशद॰ $S_3$ (unmetrical) **5ab** ॰स्तीक्ष्णैः सायकैर् ] $RA_3A_4$Bh, (॰स्तीक्षै साय)⏓र् $S_1$ (lower parts lost; fourth akṣara has vowel ऐ), ॰स्तीक्ष्णै सयकै $S_3$ **5b** ॰भेदिभिः ] R**A**Bh, –(दि)भिः $S_1$, ॰भेदिनैः $S_3$ **5c** दैत्यं ] $S_1$R**A**Bh, दैत्य $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

स भिन्नहृदयो दैत्यः सोमेन दृढमुद्धतः।
मोहं समाविशद्व्यास क्रौञ्चः शक्त्येव पर्वतः॥ ६॥
तं तथाभिसमीक्ष्यैव रथयन्ता महासुरम्।
अपोवाह महामायं धनेशं निधयो यथा॥ ७॥
ततो हाहाकृतं दैत्यैर्देवतैः साधु साध्विति।
गृह्ण गृह्णेति दैत्यैश्च मा गृह्णेति च देवतैः॥ ८॥
ततो भेर्यश्च शङ्खाश्च पणवा गोविषाणिकाः।
अवाद्यन्त सुराणां वै हर्षरागप्रवर्तनाः॥ ९॥
अथान्धकश्च तारश्च तारको नमुचिस्तथा।
विप्रचित्तिः शम्बरश्च महामायश्च दानवः॥ १०॥
धुन्धुः कार्तस्वनश्चैव राहुश्चैव महास्वनः।
शतकेतुः शतावर्तः पुलोमा पिल्वलस्तथा॥ ११॥

---

**6b** °मुद्धतः ] °मुद्यतः R **6d** क्रौञ्चः ] स्कन्द° R **7a** °मीक्ष्यैव ] °मीक्ष्यैवं R **7d** निधयो ] नि-धने R **8d** मा गृह्णेति च देवतैः ] गृह्ण गृह्णेति दैवतैः R **10a** अथान्धकश्च ] अथाकश्च R (unmetrical) **11a** °स्वन° ] °स्वर° R **11b** महास्वनः ] महास्वरः R **11d** पिल्वल° ] इल्वल° R

---

**6b** °मुद्धतः ] °मुद्यतः **A** **6c** मोहं ] $A_3$, सो हं $A_4A_7$ **6d** क्रौञ्चः ] $A_3$, क्रौञ्च $A_4A_7$ • शक्त्येव ] $A_3A_4$, शर्क्त्येव $A_7$ **7a** °मीक्ष्यैव ] °मीक्ष्यैवं $A_3$, °मीक्षैवं $A_4$, °मीक्षेवं $A_7$ **7cd** ] om. **A** **8b** °र्देवतैः ] $A_7$, °र्दैवतैः $A_3A_4$ **8d** च ] $A_3$, om. $A_4A_7$ (unmetrical) • देवतैः ] $A_7$, दैवतैः $A_3A_4$ **9b** पणवा गो° ] पणवाश्च $A_3A_4$, पनवाणाश्च $A_7$ (unmetrical) • °विषाणिकाः ] $A_3A_4$, विषालिकाः $A_7$ **9d** °वर्तनाः ] °वर्त्तना **A** **10a** °कश्च तार° ] °कः{°क° $A_4A_7$} सुतार° **A** **10b** नमुचि° ] $A_3A_4$, नसुचि° $A_7$ **10c** शम्बर° ] संवर° **A** **11a** धुन्धुः ] $A_3$, द्वंधुः $A_4$, दुन्धु $A_7$ • °स्वन° ] °स्वर° **A** **11b** राहुश्चैव महास्वनः ] महाहनुर्महासुरः **A** **11d** पिल्वल° ] पिल्वन° $A_4A_7$, इल्वण° $A_3$

---

**6**($a^2$, $a^4$) $S_3$ **8**($c^4$, $c^7$)⟨$c^8$–$d^1$⟩($d^2$–$d^3$, $d^6$, $d^8$) $S_3$ **9**($d^1$) $S_1$

---

**6a** स भिन्न° ] $S_1$R**A**Bh, स(म्भि)न° $S_3$ (unmetrical) • दैत्यः ] R**A**Bh, दैत्यो $S_1$, दैत्य $S_3$ **6b** °मुद्धतः ] $S_1$Bh, °वुद्धतः $S_3$ **6c** मोहं ] $S_3$R$A_3$Bh, मोह $S_1$ (unmetrical) **6d** क्रौञ्चः ] $A_3$Bh, क्रोञ्चः $S_1$, कौञ्जः $S_3$ • शक्त्येव ] $S_3$R$A_3A_4$Bh, शक्तेव $S_1$ **7a** °समीक्ष्यैव ] em. Bh (silently), °समीक्षैव $S_1$, °सीक्ष्येवव $S_3$ (unmetrical) **7b** रथ° ] $S_1S_3$R**A**, रथं Bh (conj.) • महासुरम् ] R**A**Bh, सहासुरं $S_1$, महासुरः $S_3$ **7c** अपोवाह ] $S_3$RBh (em.?), अपौवाह $S_1$ • महामायं ] $S_1$RBh, महामाय $S_3$ **8ab** °तं दैत्यैर्देवतैः ] R$A_7$, °तन्दैत्यै देवतै $S_1$, °तं दैत्यै देवतै $S_3^{pc}$, °तं दैत्यदेवतै $S_3^{ac}$, °तं दैत्येर्दैवतैः Bh (typo) **8d** देवतैः ] $S_1S_3A_7$, दैवतैः Bh **9a** भेर्यश्च ] $S_3$R**A**Bh, भेर्याश्च $S_1$ **9b** °विषाणिकाः ] R$A_3A_4$, °विषाणकाः $S_1$Bh, °विषाणिका $S_3$ **9c** सुराणां ] $S_3$R**A**Bh, सुरांणा $S_1$ **9d** °वर्तनाः ] RBh (em.?), °वर्त्तना $S_1S_3$ **10a** अथान्धकश्च ] em. Bh (silently), अथान्तकश्च $S_1$, तथान्धकश्च $S_3$ **10b** नमुचि° ] $S_1S_3^{pc}$R$A_3A_4$Bh, मुचि° $S_3^{ac}$ (unmetrical) **10c** विप्रचित्तिः शम्बरश्च ] RBh (em.?), विप्रचित्ति शंबरश्च $S_1$, शम्बरो विप्रचित्तिश्च $S_3$ **11a** धुन्धुः ] R$A_3$Bh, धुद्धु $S_1$, धुन्धु $S_3$ **11b** महास्वनः ] $S_3$, महाबल $S_1$, महाबलः Bh (em.?) **11c** शतकेतुः ] $S_3$R**A**Bh, शतकेतु $S_1$ **11d** पुलोमा ] $S_3$R**A**Bh, प्रलोमा $S_1$ • पिल्वल° ] $S_1^{pc}$, विल्वल° $S_1^{ac}$Bh, पिल्वक° $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

वातापी कालनेमिश्च शतावर्तः शतोदरः।
महापार्श्वो ह्रदश्चैव मुषुण्डः सुण्ड एव च॥ १२॥
दुर्लोमा च कबन्धश्च विराधो राध एव च।
मरीचश्च सुबाहुश्च श्वेतकुण्डलिरेव च॥ १३॥
वृषपर्वातिकायश्च शरभः सिंह एव च।
नरान्तको देवहनस्तथा यज्ञहनश्च यः॥ १४॥
दैत्यौ सुन्दनिसुन्दौ च शक्रतापन एव च।
प्रह्लादश्चानुह्लादश्च शिनिर्बाष्कल एव च॥ १५॥
विरोचनो बलिर्बाणो वातश्च सुमहाबलः।
मयो ऽथ तारकाक्षश्च विद्युन्माली प्रभाकरः॥ १६॥
दुन्दुभिर्महिषश्चैव अरिष्टो रिष्ट एव च।
केशी च धेनुकश्चैव अजको व्यंस एव च॥ १७॥
तथा गगनमूर्ध्वा च असिलोमा च दानवः।
सूचीलोमा तुहुण्डश्च हुण्डश्च परतापनः॥ १८॥

---

**12a** वातापी ] वातापिः R **12c** ह्रद° ] R$^{pc}$, हृद° R$^{ac}$ **12d** मुषुण्डः सुण्ड ] सुबाहुर्मुण्ड R **13** ] om. R **14a** °पर्वातिकायश्च ] °पर्व्वा कायगश्चः R **15a** सुन्दनिसुन्दौ ] शुम्भनिशुम्भौ R **15d** शिनिर्बाष्कल एव ] शिबिर्बास्कलिरेव R **16c** मयो ऽथ तारकाक्षश्च ] मायो थ भारकश्चैव R **17d** अजको व्यंस ] अजः कोव्यांश R **18a** °मूर्ध्वा ] °मूर्द्धा R **18cd** ] शूचीलोमा च कुण्डश्च परतापन एव च R

---

**12a** °पी काल° ] °पिः काल° $A_3$, °पिकाल° $A_7$, °कापिल° $A_4$ **12c** ह्रद° ] $A_3$, हृद° $A_4 A_7$ **12d** मुषुण्डः सुण्ड ] मुहूर्त्तो मुण्ड $A_3A_4$, तुमुहुर्त्तो ⟨(मु)⟩(तु)मुतु $A_7$ (unmetrical) **13ab** ] om. **A** **13d** °कुण्डलिरेव ] °कुण्डल एव **A** **14ab** ] om. **A** **14c** देवहन° ] देवान्तक° **A** **14d** यज्ञहन° ] सर्दहन° $A_4$, सहन° $A_3$ (unmetrical), दहन° $A_7$ (unmetrical) **15a** सुन्दनिसुन्दौ ] कुम्भनिकुम्भौ **A** **15cd** ] om. **A** **16–17** ] om. $A_3A_4$ **16c** मयो ] ममो $A_7$ **17a** °श्चैव ] °र्झेव $A_7$ **17b** अरिष्टो ] अरिष्टौ $A_7$ **17d** अजको ] अजक° $A_7$ **18a** °मूर्ध्वा ] °मूर्द्धा $A_3A_4$, °मुर्द्धा $A_7$ **18cd** ] शुचीनोमा तुकुंड{°मार्त्तदण्ड° $A_7$}श्च परतापन एव च **A**±

---

**13**($a^5$) $S_1$

---

**12b** शतावर्तः ] $S_3$R**A**Bh, शतावर्त्त $S_1$ **12c** ह्रद° ] $S_3$R$^{pc}$$A_3$, दर° $S_1$Bh **12d** मुषुण्डः ] $S_3$, मुसुण्डः $S_1^{pc}$Bh, मुसुण्ढः $S_1^{ac}$ • सुण्ड ] em., सुण्ढ $S_1$Bh, षण्ड $S_3$ **13a** दुर्लोमा ] em. Bh (silently), दुलोमा $S_1S_3$ • च कबन्ध° ] $S_3$, व(क्र)बन्ध° $S_1$, वक्रबन्ध° Bh **13bc** ] om. $S_3$ **13b** विराधो राध एव च ] conj., विरामो राध एव च $S_1$, विरोमा रोध एव च Bh (conj.) **14a** °पर्वाति° ] $S_3$Bh (em.?), °पर्व्वति° $S_1$ **14b** एव ] $S_3$RBh (em.?), रेव $S_1$ **14c** नरान्तको ] $S_1$R**A**Bh, नरान्तकौ $S_3$ **14d** °हनश्च ] $S_1$R**A**Bh, °हणश्च $S_3$ **15a** दैत्यौ ] R**A**Bh, दैत्यो $S_1S_3$ • सुन्द° ] $S_3$Bh (conj.?), सनन्द° $S_1$ (unmetrical) **15c** प्रह्लादश्चानुह्लाद° ] $S_1$R, प्रह्रादश्चानुह्राद° $S_3$, प्रह्लादश्चानुह्राद° Bh (em.?) **15d** °र्बाष्कल एव ] $S_1$Bh, °र्बाष्टलिरेव $S_3$ **16b** वातश्च सु° ] R$A_7$, वाताश्च सु° $S_1$, वातश्च $S_3$ (unmetrical), वाताश्वश्च Bh (conj.?) **16d** विद्युन्माली ] $S_1$R$A_7$Bh, विद्युमाली $S_3$ **17a** दुन्दु° ] $S_3$R$A_7$Bh (conj.), धुन्धु° $S_1$ • °भिर्महिष° ] $S_1^{pc}$R$A_7$Bh, °भिर्म्म(ति)ष° $S_1^{ac}$, °भि महिष° $S_3$ **18a** °मूर्ध्वा ] $S_1S_3$, °मूर्धा Bh

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

हस्ती दुर्योधनश्चैव विपाकः पाक एव च।
वलो मुरो ऽथ नरको मूकेन्द्रदमनावपि॥ १९॥
अश्वग्रीवः शम्बरश्च तथायः कालशम्बरः।
साल्वः शतभुजश्चैव द्रुमो व्याघ्रश्च दानवः॥ २०॥
मधुश्च कैटभश्चैव महाकवच एव च।
छायाग्राहश्च विख्यातः सैंहिकेयाश्च विश्रुताः॥ २१॥
हालाहलाश्च ते सर्वे बलिपुत्राश्च विश्रुताः।
तथा मयसुताः सर्वे निवातकवचाश्च ये।
पौलोमाः कालकेयाश्च विप्रचित्तिसुतास्तथा॥ २२॥
एते चान्ये च बहवो दैत्यदानवसंमताः।
सर्वे चन्द्रमसं देवं प्रति वेगं प्रचक्रिरे॥ २३॥
महिषा इव शार्दूलं हस्तिनः शरभं यथा।
विघ्ना यतव्रतं यद्वत्कामा मोक्षाश्रितं यथा॥ २४॥

---

**19d** मूकेन्द्र° ] मृकेन्द्र° R **20a** शम्बर° ] सम्बर° R **20b** तथायः ] तथापः R • °शम्बरः ] °सम्बरः R **20c** साल्वः शत° ] शाल्लः श° R (unmetrical) **20d–21a** ] om. R **21c** °ग्राहश्च विख्यातः ] °ग्रहाश्च विख्याताः R **22a** °हलाश्च ] °हलश्च R **23d** प्रति वेगं प्रचक्रिरे ] प्रतिगच्च +प्रच+क्रिरे R **24cd** ] om. R

---

**19c** मुरो ] सुरो $A_3A_7$, स्वुरो $A_4$ **19d** मूकेन्द्र° ] $A_7$, मुकेन्द्र° $A_3A_4$ • °दमना° ] °नरका° **A** **20a** शम्बर° ] $A_3A_4$, सम्बर° $A_7$ **20b** °शम्बरः ] °संवरः **A** **20c** साल्वः ] अन्धः **A** **20d–21a** ] om. **A** **21c** छायाग्राहश्च ] मायाग्रहश्च **A** **21d** विश्रुताः ] $A_3A_4$, विश्रुतः $A_7$ **22a** °हलाश्च ] $A_3A_4$, °हलाद्य $A_7$ **22b** विश्रुताः ] $A_3A_4$, विश्रूताः $A_7$ (unmetrical) **23b** °संमताः ] $A_3A_4$, सम्वताः $A_7$ **23c** चन्द्रमसं ] चन्द्रमयं **A** **24** ] om. **A**

---

**19**(c¹) $S_1$ **21**(a²) $S_1$ **22**(c²–c⁴) $S_1$ **23**(c²) $S_1$

---

**19b** विपाकः ] $S_3^{pc}$R**A**Bh, विपाक $S_1S_3^{ac}$ (unmetrical) **19d** °न्द्रदमना° ] $S_1S_3^{pc}$RBh, °न्द्र⟨म⟩दमना° $S_3$ **20a** °ग्रीवः ] $S_3$R**A**Bh, °ग्रीव $S_1$ • शम्बर° ] $S_1S_3A_3A_4$, सम्बर° Bh (em.?) **20b** तथायः ] $S_3$**A**, तताय $S_1$ (unmetrical), तथान्यः Bh (conj.) • °शम्बरः ] $S_1$, एव च $S_3$, °संवरः Bh **20c** साल्वः ] em., साल्व $S_1S_3$, शाल्वः Bh (em.?) **21b** °कवच ] $S_3$R**A**, °मगर $S_1^{pc}$, °मशर $S_1^{ac}$, °संगर Bh (conj.) **21c** °ग्राहश्च ] $S_1S_3$, °ग्रहश्च Bh • विख्यातः ] **A**Bh, विख्याता $S_1$, विख्यातो $S_3$ **21d** सैंहिकेया° ] $S_1^{pc}$R**A**Bh, सौंहिकेया° $S_1^{ac}$, सैहिंकेया° $S_3$ • विश्रुताः ] $S_1$R$A_3A_4$Bh, विश्रुता $S_3$ **22a** °हलाश्च ] $S_1A_3A_4$Bh, °हलश्च $S_3$ **22b** विश्रुताः ] R$A_3A_4$Bh, विश्रुता $S_1S_3$ **22c** तथा ] $S_3$R**A**Bh, अ(था) $S_1$ • मयसुताः ] $S_1$R**A**Bh, यमसुता $S_3$ **22e** पौलोमाः ] R**A**Bh, पौलोमा $S_1S_3$ **22f** °स्तथा ] $S_3$R**A**, °श्च ये $S_1$Bh **23a** बहवो ] $S_1S_3$R**A**, बहुशो Bh (conj.?) **23b** °संमताः ] $S_3$R$A_3A_4$Bh, °सम्मता $S_1$ **23c** °सं देवं ] RBh (em.?), °सन्देव $S_1S_3$ **23d** वेगं ] $S_3$**A**Bh, वेग $S_1$ **24a** शार्दूलं ] R, शार्द्दूल $S_1$, शादूलं $S_3$, – – – Bh **24b** हस्तिनः ] $S_3$RBh (em.?), हस्तिन $S_1$ (unmetrical) • शरभं यथा ] $S_1^{pc}$RBh, शलभं यथा $S_1^{ac}$, शरभन्तथा $S_3$ **24c** यतव्रतं ] $S_1S_3$, यतप्रतं Bh (typo) **24d** °त्कामा ] em. Bh (silently), °त्काम $S_1$, °त्कामां $S_3$ • मोक्षाश्रितं ] $S_1$Bh, मोक्षाशृतं $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

इन्द्रियार्था यथा योगमनर्था इव दुःखितम्।
नागा इव गरुत्मन्तं भ्रमरा इव पादपम्॥ २५॥
तथा ते दानवाः सर्वे प्रगृहीतवरायुधाः।
दुद्रुवुः शशिनं देवं महाजलदनिस्वनाः॥ २६॥
तेषामापततां व्यास तिमिरारिर्हसन्निव।
उद्यतान्यायुधानि स्म शरैश्चिच्छेद सर्वशः॥ २७॥
तत एनान्पुनर्देवः सर्वानेव रुषान्वितः।
हृदयेषु शरैस्तीक्ष्णैर्बिभेद च ररास च॥ २८॥
तुषारेण च शीतेन ताराधिपतिरव्ययः।
आजघानासुरान्सर्वान्क्रोधसंरक्तलोचनः॥ २९॥
ते शरैश्च विनिर्भिन्नाः शीतेन च भृशार्दिताः।
स्थितास्तत्रैव दैत्येन्द्राश्चित्रपट्टार्पिता इव॥ ३०॥
चन्द्रो ऽपि देवः समरे मण्डलीकृतकार्मुकः।
बिभेद सर्वान्दैत्येन्द्रान्नर्दमानः पयोदवत्॥ ३१॥

---

**25ab** ] ईतिः पार्थांश्च योगज्ञान् समर्था इव पण्डितम् R **25d** पादपम् ] कुञ्जरं R **27a** °मापततां ] °माततां R (unmetrical) **28a** एनान् ] एतान् R **30cd** °न्द्राश्चित्र° ] °न्द्राः केचित् R **31c** सर्वान् ] सर्व° R

---

**25ab** ] इन्द्रियात्मा यथा योगम{रोगं स° $A_7$}नघा इव पण्डितं **A**± **25c** गरुत्मन्तं ] महद्भूत्तं{°न्तं $A_7$} **A** **26b** °गृहीतवरायुधाः ] $A_3A_4$, °ग्रहीतवरायुधा $A_7$ **26c** दुद्रुवुः ] $A_4$, दुद्रवुः $A_3$, दुक्रवुः $A_7$ • शशिनं ] $A_7$, सलिलं $A_3A_4$ **27b** °र्हसन्नि° ] $A_3A_4$, °र्हषन्नि° $A_7$ **28a** एनान्पुनर्देवः ] एतान् शनै{सनि° $A_7$}र्देवः **A** **28b** रुषा° ] $A_3$, वृषा° $A_4$, रषा° $A_7$ **28d** °र्बिभेद ] °श्चिच्छेद **A** **29ab** ] om. **A** **29c** आजघाना° ] $A_3A_4$, अजसाला° $A_7$ **30a** शरैश्च ] सर्वैश्च $A_3A_4$, सर्व्वेश्च $A_7$ • °निर्भिन्नाः ] $A_3A_4$, °निभिन्नाः $A_7$ (unmetrical) **30b** भृशा° ] $A_3A_4$, इशा° $A_7$ **30c** स्थितास्त° ] $A_3A_4$, स्थिता त° $A_7$ **30d** °पट्टार्पिता इव ] °पट्टा इवार्पिताः **A** **31c** °न्दैत्येन्द्रान् ] °न् दैत्यान्स{°न् सा $A_7$} **A**

---

**26**($c^6$) $S_1$ **28**($b^1$) $S_1$ **29**($c^7$) $S_1$

---

**25b** इव दुःखितम् ] $S_1S_3$, दुःखितं यथा Bh (conj.) **25c** नागा ] $S_1$R**A**Bh, नगा $S_3$ • गरुत्मन्तं ] $S_3$RBh (em.?), गरत्मन्तः $S_1$ **26a** दानवाः ] $S_1$R**A**Bh, दानवा $S_3$ **26b** °गृहीत° ] $S_1RA_3A_4$Bh, °गृहीता° $S_3$ • °रायुधाः ] $S_3RA_3A_4$Bh, °रायुधा $S_1$ **26c** दुद्रुवुः ] $S_1RA_4$Bh, दुद्रुवः $S_3$ • शशिनं देवं ] $RA_7$, शिशि(न)न्देवं $S_1$, शशिनं देव $S_3$, शिशिरं देवं Bh (conj.?) **26d** °निस्वनाः ] R**A**Bh, °निस्वना $S_1S_3$ **27a** °मापततां ] $S_3$**A**Bh, °मापततं $S_1$ **27b** °रिर्हसन्नि° ] $RA_3A_4$Bh, °रि हसन्नि° $S_1$, °रिर्हसनि° $S_3$ (unmetrical) **27d** शरैश्चि° ] R**A**Bh, शरै श्वि° $S_1$, शरै $S_3$ (unmetrical) **28a** तत एनान् ] $S_3$, तत एनं $S_1$, ततः स तान् Bh (conj.) • °नर्देवः ] R Bh (em.?), °न द्देवा $S_1$, °नर्देव $S_3$ **28b** °नेव ] $S_3$R**A**Bh, °न्नेव $S_1$ • रुषान्वितः ] $S_3RA_3$Bh, रुषान्विताः $S_1$ **28cd** °रैस्तीक्ष्णैर्बि° ] RBh (em.?), °रैः स्तीक्ष्णैः बि° $S_1$, °रैस्तीक्ष्णै बि° $S_3$ **29a** तुषारेण ] RBh (em.?), तुशारेण $S_1S_3$ **29b** °रव्ययः ] $S_1^{pc}S_3$RBh, °री(श्व)रः $S_1^{ac}$ **29c** आजघाना° ] $S_1RA_3A_4$Bh, अजघाना° $S_3$ **30a** ते ] $S_1$R**A**Bh, तैः $S_3$ • विनिर्भिन्नाः ] $RA_3A_4$Bh, विनिर्भिन्ना $S_1$, विभिना $S_3$ (unmetrical) **30b** भृशार्दिताः ] $RA_3A_4$Bh, भृषार्द्दिताः $S_1$, भृशादिताः $S_3$ **30c** स्थितास्त° ] $RA_3A_4$Bh, स्थिता त° $S_1S_3$ **30cd** दैत्येन्द्राश्चि° ] $S_3^{pc}$**A**Bh, दैत्येन्द्रा चि° $S_1$, दैत्ये⟨न्द्रो⟩+न्द्रा+श्चि° $S_3$ **30d** °पट्टार्पिता ] $S_1$RBh, °पट्टापिता $S_3$ **31a** देवः ] R**A**Bh, देव $S_1S_3$ **31c** सर्वान्दैत्येन्द्रान् ] em. Bh (silently), सर्व्वा दैत्येन्द्रा $S_1$, सर्वा दैत्येन्द्र $S_3$ **31d** °र्दमानः ] $S_3$R**A**Bh, °र्द्दमान $S_1$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

यः कश्चिद्दानवो वापि दैत्यो वा मुनिसत्तम।
सर्व एव शरांस्तस्य दधिरे शशिनस्तथा॥ ३२॥
यत्किंचिच्चालयत्यङ्गं तत्र दैत्यः कदाचन।
तत्तत्तीक्ष्णैः शरैर्देवो बिभेद च ररास च॥ ३३॥
ब्रुवतो दैत्ययोधस्य यत्र क्वचन संयुगे।
निचखान शरानष्टौ मुखे तस्यापि चन्द्रमाः॥ ३४॥
निष्पन्दास्ते स्थिताः सर्वे मूकवच्चासुरोत्तमाः।
शरनिर्भिन्नसर्वाङ्गाश्चित्रपट्टार्पिता इव॥ ३५॥
यथा स भगवान्देवश्चन्द्रमा दानवार्दनः।
तथैव भगवान्वह्निरर्दयद्दानवान्युधि॥ ३६॥
तद्रथाश्वगजयोधसंकुलं प्रक्षरद्रुधिरबिन्दुविह्वलम्।
सीदते गजकुलोपमं बलं पङ्कलग्नमिव सर्वमुल्बणम्॥ ३७॥

इति स्कन्दपुराणे नवतितमो ऽध्यायः॥ ९०॥

---

**32d** दधिरे ] दध्रिरे R **33a** °च्चालयत्य° ] °द्वालपत्य° R **33c** तत्तत्ती° ] ततस्ती° R **34a** ब्रुवतो दैत्ययोधस्य ] ध्रुवतो योधदैत्यस्य R **34b** क्वचन ] केचन R **35a** निष्पन्दा° ] निष्पन्ना° R **36c** तथैव ] तत्रैव R **36d** °रर्दयद् ] °रर्द्दयन् R **37a** °संकुलं ] °संकुल° R **37b** °विह्वलम् ] °विज्वलम् R **37d** °मुल्बणम् ] °मुल्बनम् R **Col.** इति +स्कन्दपुराणे+ रेवाखण्डे ऽध्यायः R

---

**32a** यः ] $A_3A_4$, यष $A_7$ (unmetrical) **32b** °सत्तम ] $A_3A_4$, °सत्तमः $A_7$ **32d** दधिरे ] दध्रिरे $A_3A_4$, (द)ध्ररे $A_7$ **33ab** ] om. **A** **33c** तत्तत्ती° ] ततस्ती° **A** **33d** ररास ] $A_3$, रराम $A_4A_7$ **35a** निष्पन्दा° ] निष्पन्ना° $A_3A_7$, निश्यन्ना° $A_4$ **35b** मूक° ] $A_4A_7$, मृक° $A_3$ **35cd** °र्वाङ्गाश्चि° ] $A_3A_4$, °र्व्वाङ्गंश्चि° $A_7$ **36a** स ] हि **A** **36d** °रर्दयद्दानवान्युधि ] °रार्दयन् युधि तच्च वै **A** **37d** °मुल्बणम् ] °सस्वनः $A_3A_4$, °सुस्वन् $A_7$ (unmetrical) **Col.** इति{इति श्री° $A_3$} स्कन्दपुराणे एकाशीतिसाहस्र्यां संहिताया{इति स्कंद° $A_4$}मम्बिकाखण्डे सोमजयो{°जवो $A_3A_4$} नामाध्यायः **A**±

---

**32**(c[8]) $S_1$ **33**(a[2]) $S_1$ **34**(b[3]) $S_1$ **37**(a[10]) $S_1$, (b[11]) $S_3$

---

**32a** यः कश्चिद् ] $RA_3A_4Bh$, यः कश्चि $S_1$, य कश्चि $S_3$ **32b** °सत्तम ] $RA_3A_4Bh$, °सत्तमः $S_1S_3$ **32d** °स्तथा ] $S_1RA$, °स्तदा $S_3Bh$ (conj.) **33a** यत्किंचिच्चा° ] $S_1$, यत्किञ्चि चा° $S_3$, यात्किञ्चि-च्चा° Bh (typo) • °यत्यङ्गं ] $S_3Bh$ (conj.?), °यव्यंगं $S_1$ **33b** दैत्यः ] $S_3RBh$ (em.?), दैत्य $S_1$ • कदाचन ] RBh (em.?), कदाचनः $S_1S_3$ **33c** तत्तत्तिक्ष्णैः ] $S_3Bh$ (em.?), त तत्तीक्ष्णै $S_1$ • शरैर् ] $S_1RABh$, शरै $S_3$ **34c** शरानष्टौ ] $S_1RABh$, शरान्यष्टौ $S_3$ **34d** चन्द्रमाः ] $S_1RA$ Bh, चन्द्रमा $S_3$ **35a** निष्पन्दा° ] em. Bh (silently), निष्पन्दो $S_1$, निस्पंदा° $S_3$ • स्थिताः ] RABh, स्थिता $S_1S_3$ **35b** मूकवच्चा° ] $S_1RA_4A_7Bh$, मूकचचा° $S_3$ (unmetrical) **35c** °निर्भि-न्न° ] $S_1RABh$, °निर्भिन° $S_3$ (unmetrical) **35cd** °र्वाङ्गाश्चित्र° ] $S_3RA_3A_4Bh$, °र्व्वांगा चित्त° $S_1$ **35d** °पट्टार्पिता ] $S_1RABh$, °पट्टापिता $S_3$ **36ab** °वान्देवश्च° ] $S_3RABh$, °वां देव च° $S_1$ **36c** °वान्वह्नि° ] $S_1RABh$, °वा वह्नि° $S_3$ **36d** °रर्दयद् ] em., °रर्द्दयं $S_1$, °रार्दयन् $S_3$, °रार्दयद् Bh (em.?) **37b** °विह्वलम् ] $S_1S_3^{ac}ABh$, °विह्व(कं) $S_3^{pc}$ **37c** सीदते ] $S_1RABh$, सीसीदते $S_3$ (unmetrical) • °कुलोपमं बलं ] $S_3^{pc}RABh$, °⟨ल⟩कुलोपमम्ब $S_1$ (unmetrical), °कुलोपमं थलं $S_3^{ac}$ **37d** पङ्क° ] $S_1RABh$, पक° $S_3$ (unmetrical) • °मुल्बणम् ] $S_3Bh$, °मुल्बणमिति $S_1$ (इति part of col.) **Col.** ☉॥ स्कन्दपुराणे युद्धे आध्यायः १४६ (in letter numerals)॥ ☉ $S_1$, ☉॥ स्कन्दपुराणे नामाध्यायः ९० (in letter numerals)॥ ☉ $S_3$, इति स्कन्दपुराणे युद्धे नवतितमोध्यायः Bh

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

# एकनवतितमो ऽध्यायः।

सनत्कुमार उवाच।
तस्मिन्बले तथा तेन सोमेनाप्रतिमौजसा।
हन्यमाने महामायः समाश्वस्य तदासुरः॥ १॥
हिरण्याक्षो दितेः पुत्र इदमाह रुषान्वितः।
गरुत्मतः सुतं वीरं रथयन्तारमब्रवीत्॥ २॥
खगेश्वर न ते लज्जा भवतीह रणार्णवे।
यन्मा रथेन संग्रामात्त्वं हरस्यन्यतो ऽद्य वै॥ ३॥
किं वक्ष्यन्त्यसुराः सर्वे दैत्याश्चैव महाबलाः।
राजास्माकं जितः संख्ये शत्रुभिः शत्रुतापनः॥ ४॥
जीवितैषी परित्यज्य बालानस्मान्दुरात्मवान्।
रणादद्य गतः क्वापि धिङ्मामशुभकारिणम्॥ ५॥

---

**1a** तथा ] तदा R **1d** समाश्वस्य ] समाश्वास्य R **3b** रणार्णवे ] रणान्तरे R **3c** यन्मा ] यन्मां R **4a** किं वक्ष्यन्त्य° ] तं रक्षन्त्य° R **4d** शत्रुभिः ] शत्रुभि R (unmetrical) **5a** जीवितैषी ] जीवितैषैः R **5b** बालान° ] भयाद° R

---

**1a** °न्बले ] $A_3A_4$, °न् वने $A_7$ • तथा ] तदा **A** **1b** °मौजसा ] $A_7$, °मोजसा $A_3A_4$ **1c** हन्यमाने ] हन्यमानो **A** **1cd** °मायः समाश्वस्य ] °मायस्तथास्वास्य $A_3A_4$, °मायास्तथाथास्य $A_7$ **2c** गरुत्मतः ] $A_3A_7$, गरुन्मत्तः $A_4$ • सुतं ] शुभं **A** **3a** लज्जा ] $A_3A_4$, नज्जा $A_7$ **3b** रणार्णवे ] रणान्तरे **A** **3c** यन्मा ] यन्मां **A** **3d** हरस्य° ] वहस्य° $A_3A_7$, रहस्य° $A_4$ **4a** वक्ष्यन्त्य° ] रक्षन्त्य° **A** **4b** दैत्याश्चैव महाबलाः ] दैत्य{°त्यै° $A_4$}श्चैव महाबलः **A** **4cd** ] om. **A** **5a** जीवितैषी ] $A_3$, जीवितैसि $A_4$, जिवी{°वि° $A_7^{ac}$}तैषि $A_7$ • परित्यज्य ] परानद्य{°घ $A_4$} **A** **5b** बालान° ] $A_3A_4$, बालाल° $A_7$ **5d** धिङ्माम° ] धीमान° $A_3A_7$, धीमान् $A_4$ (unmetrical)

---

Manuscripts available for this chapter: $S_1$ 8.22b (f. $144^v$), 4.16 (f. $145^r$; change of scribe from $4a^2$ at the beginning of folio; new hand distinguishes the letter b from v) and 4.15b (f. $145^v$); $S_3$ f. $146^r$–$147^r$; R f. $164^v$–$165^v$; $A_3$ f. $97^r$–$97^v$; $A_4$ f. $139^v$–$140^r$; $A_7$ f. $136^v$–$137^v$.
**5**($a^3$–$a^4$, $c^2$–$c^4$) $S_1$, ($a^3$–$a^4$) $S_3$

---

**1a** तस्मिन्बले ] $S_3RA_3A_4$Bh, तस्मिम्मले $S_1$ **1b** °नाप्रतिमौजसा ] $RA_7$Bh (em.?), °नाप्रतिमोजसा $S_1$, °न प्रतिमोजसा $S_3$ **1c** हन्यमाने ] $S_1^{pc}S_3$RBh, (स)न्यमाने $S_1^{ac}$ • महामायः ] RBh (em.?), महामाय $S_1S_3$ **1d** समाश्वस्य ] $S_1^{pc}S_3$Bh, समा(स)स्य $S_1^{ac}$ **2a** दितेः ] $S_3$R**A**Bh, दिते $S_1$ **2b** रुषान्वितः ] $S_1$R**A**Bh, रुथान्वितः $S_3$ **2c** गरुत्मतः ] $RA_3A_7$Bh, मरुत्मन्त $S_1$, गरुत्मत $S_3$ **2d** °मब्रवीत् ] $S_1S_3$R**A**, °माहवे Bh (conj.) **3a** लज्जा ] $S_1RA_3A_4$Bh, लजा $S_3$ (unmetrical) **3b** रणार्णवे ] $S_1^{pc}S_3$Bh, र⟨(र्ण्ण)⟩+णा+र्ण्णवे $S_1$ **3c** यन्मा ] em., त्वं मा $S_1$, तन्मा $S_3$, यन्मां Bh • रथेन ] $S_1$R**A**Bh, रथन $S_3$ **3cd** संग्रामात्त्वं ] $S_3$R**A**Bh, संग्रामो त्वं $S_1$ **4a** किं वक्ष्यन्त्यसुराः ] em. Bh (silently), किं वक्षत्यसुरा $S_1$, किम्वक्ष्यन्त सुरा $S_3$ **4c** जितः संख्ये ] RBh (em.?), जितस्संखे $S_1$, जित+ः+ संखे $S_3$ **4d** °तापनः ] $S_1^{pc}S_3$RBh, °तापन $S_1^{ac}$ **5b** बालानस्मान् ] $A_3A_4$Bh, बलानस्मा $S_1$ (tops lost), बालानास्मां $S_3$ • °रात्मवान् ] $S_3$R**A**Bh, °रात्मनान् $S_1$ **5c** °दद्य गतः ] $S_1S_3$R**A**, °दपगतः Bh (conj., Bh reads °दुपगतः in $S_1$) **5d** धिङ्माम° ] $S_3$RBh, धिक्माम° $S_1$ • °कारिणम् ] $S_1$R**A**Bh, °कारिणां $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

कश्यपस्य सुतो भूत्वा भ्राता दैत्यस्य संमतः।
हिरण्यकशिपोर्दैत्यो महायोगबलान्वितः॥ ६॥
अग्रतः सर्वदैत्यानां दानवानां तथैव च।
राजा स्वामी च वृद्धश्च निर्जितः शत्रुभिः कथम्॥ ७॥
अथवा देवपक्षस्य त्वं पुत्रो वै गरुत्मतः।
तमेव पक्षं भजसे न मा त्वं परिरक्षसे॥ ८॥
नाहं तव न शक्तो ऽद्य शिरः कायात्सकुण्डलम्।
खड्गेनानेन तीक्ष्णेन छेतुं खगकुलाधम॥ ९॥
मित्रं त्वं मम मन्दस्य पुरा बालसखेति च।
अतः कृत्वाभिरक्षामि गच्छ मुक्तो ऽसि दोषवान्॥ १०॥
तस्य तद्वचनं श्रुत्वा रथयन्ता खगेश्वरः।
उवाच श्लक्ष्णया वाचा हिरण्याक्षं महासुरम्॥ ११॥
मा क्रुधो दानवश्रेष्ठ नास्मि दैत्य तवाहितः।
त्वं हि मूढो ऽभवत्पूर्वं शरेण हृदि विक्षतः।
ततो ऽपवाहितः क्षिप्रं रणाद्रक्षार्थमेव हि॥ १२॥

---

**7a** अग्रतः ] अग्रजः R **7c** राजा स्वामी च वृद्धश्च ] राजास्मि वीरः शूरश्च R **8a** ॰पक्षस्य ] ॰पक्षश्च R **8d** मा ] मां R **9a** नाहं तव न ] अहं तावच्च R **9c** ॰नानेन ] ॰न तेन R **9d** ॰कुलाधम ] $R^{pc}$, ॰कुलाधमः $R^{ac}$ **10b** पुरा बाल॰ ] पुराणश्च R **10c** अतः ] अथ R • ॰रक्षामि ] ॰रक्ष्यामि R **12a** क्रुधो ] क्रोध R **12c** ऽभवत् ] भवन् R

---

**6a** कश्यपस्य ] $A_3A_4$, कस्यपस्य $A_7$ **6b** संमतः ] सत्तमः **A** **6c** ॰कशिपो॰ ] ॰कशिपु॰ **A** **7c** राजा ] $A_3$, राज $A_4A_7$ • वृद्धश्च ] शूरश्च $A_3A_4$, सूरश्च $A_7$ **8b** गरुत्मतः ] $A_3A_4$, गरुत्मजः $A_7$ **8c** भजसे ] लभसे **A** **8d** न मा त्वं ] मां त्वं{त्वां $A_4$} न $A_3A_4$, मां त्वान् $A_7$ (unmetrical) **9a** न शक्तो ] नखाक्तो **A** **9d** ॰कुलाधम ] $A_3$, ॰कुला{॰ना॰ $A_7$}धमः $A_4A_7$ **10a** मित्रं त्वं ] मित्रस्य **A** • मम मन्दस्य ] म{स॰ $A_4$}म मन्वस्य $A_3A_4$, ममन्वस्य $A_7$ (unmetrical) **10b** बाल॰ ] बालः **A** **10c** ॰रक्षामि ] $A_7$, ॰वक्षामि $A_4$, ॰वक्ष्यामि $A_3$ **11b** रथयन्ता ] $A_4$, रथमन्ता $A_7$, स⊔यांसा $A_3$ **12a** मा क्रुधो दानवश्रेष्ठ ] नात्र लज्जा दानवेश $A_3A_4$, मात्र लज्जा दानवश्रेष्ठ $A_7$ (unmetrical) **12b** तवाहितः ] $A_3A_4$, वाहितः $A_7$ (unmetrical) **12c–f** ] om. **A**

---

**6**($a^8$–$b^3$, $c^1$–$c^8$, $d^3$–$d^4$)⟨$d^5$–$d^8$⟩ $S_1$ **7**⟨$a^1$–$a^2$⟩($a^3$–$a^6$, $a^8$) $S_3$ **10**($b^8$)⟨$c^1$⟩ $S_3$ **11**($b^1$) $S_1$

---

**6a** कश्यपस्य ] $S_1RA_3A_4Bh$, काश्यपस्य $S_3$ **6c** ॰कशिपोर्दै॰ ] RBh (conj.), (॰कशिपुद॰) $S_1$ (upper parts lost), ॰कशिपो दै॰ $S_3$ **6d** महायोग॰ ] $S_3$R**A**Bh, महा(माया॰) $S_1$ **7a** ॰दैत्यानां ] $S_3$R**A**Bh, ॰दैत्याना $S_1$ **7c** स्वामी च ] $S_3$**A**Bh, स्वामीव $S_1$ • वृद्धश्च ] $S_1S_3$, शूरश्च Bh **8b** त्वं ] $S_1$R**A**Bh, त्रं $S_3$ • गरुत्मतः ] $S_3RA_3A_4Bh$, गरुद्मतः $S_1^{pc}$, गरु(ज)तः $S_1^{ac}$ **8c** पक्षं ] R**A**Bh, पक्ष्मम् $S_1$, पक्ष $S_3$ **8d** मा ] $S_1S_3$, मां Bh (em.?) **9a** शक्तो ऽद्य ] RBh (conj.?), क्नो द्य $S_1$ (unmetrical), शक्तो ह $S_3$ **9b** शिरः का॰ ] $S_3$R**A**Bh, शिरस्का॰ $S_1$ **9c** खड्गेना॰ ] $S_3$**A**Bh, खड्गेना॰ $S_1$ **9d** ॰कुलाधम ] $S_1R^{pc}A_3Bh$, ॰कुलाधमः $S_3$ **10a** मित्रं ] RBh (em.?), मित्र $S_1S_3$ **10b** बाल॰ ] $S_1Bh$, बाधः $S_3$ • ॰सखेति ] $S_3$R**A**Bh, ॰सुखैति $S_1$ **10c** ॰रक्षामि ] $S_3A_7Bh$ (conj.?), ॰रक्षा $S_1$ (unmetrical) **12a** क्रुधो ] $S_3Bh$ (em.?), क्रुद्धो $S_1$ • ॰श्रेष्ठ ] $RA_7Bh$ (em.?), ॰श्रेष्ठो $S_1$, ॰श्रेष्ट $S_3$ **12b** नास्मि ] $S_1$R**A**Bh, नास्मिं $S_3$ **12cd** ] ($S_3$)(R), om. $S_1Bh$ **12d** शरेण हृदि ] R, शरेणा ह्यदि $S_3$ **12e** ततो ऽप॰ ] $S_1S_3R$, तदोप॰ Bh (conj.) **12f** हि ] $S_1^{pc}S_3RBh$, च $S_1^{ac}$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

सूताः शास्त्रविदश्चैव ब्रुवते दानवेश्वर।
दम्पती रथियन्तारौ परस्परमनुव्रतौ॥ १३॥
रथिना शस्त्रघातेभ्यो रक्ष्यो यन्ता यथा प्रिया।
तेन चैव रथी रक्ष्यो यथा भर्ता जयावहः॥ १४॥
स भवान्रिपुणा भिन्नो ह्यवबद्धश्च संयुगे।
अशक्तः स्यादितीत्येवं मया क्षिप्रं प्रवाहितः॥ १५॥
आश्वस्य बलमादाय पुनर्युद्धेन दंशितः।
रिपुं जेष्यसि संग्रामेत्येवं त्वमपवाहितः॥ १६॥
ये हि काले ऽपयान्ति स्म काले चायान्ति दंशिताः।
तेषां नु सुलभो दैत्य जयो युद्धे महात्मनाम्॥ १७॥
न चाहमहितः सत्यं हितकृत्तव नित्यदा।
मा शङ्कां कुरु दैत्येन्द्र शपे सत्येन सर्वतः॥ १८॥

---

**13a** सूताः ] मृताः R **13b** ब्रुवते ] ध्रुवन्ते R **13c** रथि° ] रथ° R **13d–16a** ] om. R **16b** °र्युद्धेन दंशितः ] °र्युद्धे च दर्शितः R **16c** जेष्यसि ] जेष्यामि R **16d** °त्येवं त्व° ] ततस्त्व° R **17ab** ] ये हि कालं न जानन्ति अकाले यान्त्यदर्शिताः R **17c** नु सुलभो ] (न)⏓ ⏑भो R **18c** मा ] ना° R **18d** सर्वतः ] सर्वशः R

---

**13a** सूताः ] $A_3$, सुताः $A_7$, शुताः $A_4$ • °श्चैव ] °श्चैवं **A** **13b** ब्रुवते ] कुर्वते $A_3A_4$, कुर्व्वन्ते $A_7$ • °वेश्वर ] $A_7$, °वेश्वरः $A_3A_4$ **13c** रथि° ] रथ° **A** **14b** रक्ष्यो ] रक्षो $A_7$, वक्षो $A_3A_4$ • प्रिया ] प्रियां **A** **14c–15b** ] om. **A** **15c** °क्तः स्यादितीत्येवं ] °क्तश्चा{°भ्या° $A_7$}पि दैत्यै{°त्ये° $A_4A_7$}वं **A** **16a** आश्वस्य ] अश्वस्य $A_3A_4$, वम्वस्य $A_7$ **16b** °र्युद्धेन ] $A_3A_4$, °र्युर्द्धेन $A_7$ **16d** °त्येवं ] ह्येवं **A** • °मपवाहितः ] °मपलायि{°पि° $A_4$, °न्वि° $A_7$}तः **A** **17a** ऽपयान्ति ] प्रयान्ति **A** **17c** नु सुलभो ] तु सुलभो $A_3A_4$, नु सुभो $A_7$ (or न्व°, unmetrical) **18a** न चाहमहितः सत्यं ] तवाहमिति मत्वा वै **A**± **18b** हितकृत्तव ] $A_4$, हितकृतव $A_3$ (unmetrical), हितः कृष्ण $A_7$ (unmetrical) **18c** मा शङ्कां ] $A_7$, नाशंकां $A_4$, नाशंका $A_3$ **18d** शपे ] शाप° **A** • सत्येन सर्वतः ] °सत्येन सर्वशः $A_3A_4$, °सत्ये सर्वशच $A_7$ (unmetrical)

---

**14**($a^4$–$a^7$, $c^6$) $S_1$

---

**13a** सूताः ] $S_3A_3$Bh, सूत $S_1$ • शास्त्र° ] $S_1$R**A**Bh, शस्त्र° $S_3$ • °श्चैव ] $S_1$RBh, °श्चैनं $S_3$ **13b** ब्रुवते ] $S_1$Bh, ब्रुवतो $S_3$ • °वेश्वर ] $S_3RA_7$Bh (em.?), °वेश्वरः $S_1$ **13c** रथि° ] conj. Bh (silently), रथ° $S_1S_3$ • °यन्तारौ ] $S_3$R**A**Bh, °यन्तारो $S_1$ **13d** °व्रतौ ] $S_3$**A**Bh, °ब्र-तौ $S_1$ **14b** रक्ष्यो ] em. Bh (silently), रक्षो $S_1S_3$ • यन्ता ] $S_1S_3^{pc}$**A**Bh, यहा $S_3^{ac}$ **14c** रथी ] conj., र(थो) $S_1$, रथो $S_3$Bh • रक्ष्यो ] $S_3$Bh (em.?), रक्षो $S_1$ **14d** जयावहः ] $S_3$Bh (em.?), जयावह $S_1$ **15a** भवान्रिपु° ] em. Bh (silently), भवा रिपु° $S_1^{pc}$, भवान्निपु° $S_1^{ac}$, भवां नृपु° $S_3$ • भिन्नो ] $S_1$Bh, भिनो $S_3$ (unmetrical) **15b** संयुगे ] $S_1^{pc}S_3$Bh, संयु(त) $S_1^{ac}$ **15d** °प्रं प्रवाहितः ] **A**, °प्रवाहितः $S_1$ (unmetrical), °प्रं प्रणाशितं $S_3$, °प्रमपोहितः Bh (conj.) **16a** आश्वस्य ] $S_3$Bh (em.?), अश्वस्य $S_1$ • °मादाय ] $S_1S_3$**A**, °माधाय Bh (conj.) **16b** °र्युद्धेन ] $S_1A_3A_4$Bh, °र्व्युद्धेन $S_3$ • दंशितः ] **A**Bh, दंसितः $S_1$, दंशिता $S_3$ **16c** रिपुं ] $S_3$R**A**, ऋपूञ् $S_1$, रिपूञ् Bh (em.?) • जेष्यसि ] $S_1$**A**Bh, जेष्यति $S_3$ **16d** °त्येवं ] $S_1^{ac}$, व्येवं $S_1^{pc}$, न्येव $S_3$, त्वेवं Bh (conj.) **17a** काले ] $S_1$**A**Bh, कालो $S_3$ **17b** दंशिताः ] **A**Bh, दंसिता $S_1$, दंशिता $S_3$ **17c** तेषां नु ] $A_7$, तेषान्न $S_1$, तेषां न $S_3$, तेषां ना° Bh (conj.) **17d** युद्धे ] $S_1$R**A**Bh, बुद्धे $S_3$ • महात्मनाम् ] $S_3^{pc}$R**A**Bh, महात्मनान् $S_1$, (स)हात्मनां $S_3^{ac}$ **18a** °महितः ] RBh (em.?), °महित $S_1S_3$ (unmetrical) **18b** नित्यदा ] $S_3$R**A**Bh, नित्यदाः $S_1$ **18c** शङ्कां ] $S_3RA_4A_7$Bh, शङ्का $S_1$ • कुरु दै° ] $S_1$R**A**Bh, कुरुन्दै° $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

न चैतद्भीतवाक्यं मे कृतो ऽहममरः पुरा।
तथैवामृतपश्चाहं न मृत्युर्मम विद्यते॥ १९॥
अहं गरुत्मतः पुत्रो देवान्हित्वासुरान्गतः।
तवैव दैत्य स्नेहेन मा शङ्कां त्वं कृथा मयि॥ २०॥
एतद्बलं चन्द्रमसा वह्निना चावपीडितम्।
त्राहि क्षिप्रं महाबाहो न शोकं कर्तुमर्हसि॥ २१॥
इमं रथं समास्थाय धनुषा वा बलेन वा।
जहि शत्रून्महाराज मा नश्यन्तु दितेः सुताः॥ २२॥
सनत्कुमार उवाच।
ततः स तं परिष्वज्य पक्षिराजं महासुरः।
अभिदुद्राव वेगेन रथेनाम्बुदनादिना॥ २३॥
तस्यापतत एवाथ सवह्निश्चन्द्रमास्तथा।
शरैराशीविषाकारैर्ध्वजं चिच्छेदतुर्युधि॥ २४॥

---

**19** ] न चैव भीतीवाच्यैस्ते कृतवान् शपथान् पुरा। यतो हममृतं प्राप्य चामरत्वमवाप्तवान् R **20b** देवान्हित्वासुरान्गतः ] देवह त्वां समाश्रितः R **20c** तवैव दैत्य ] तव दैतेय R **21b** चाव° ] चापि R **21c** त्राहि क्षिप्रं ] क्षिप्रं त्राहि R **21d** न ] मा R **22b** बलेन ] रणेन R **22c** शत्रून्महाराज ] शत्रुं महाबाहो R **23a** परिष्वज्य ] परित्य R (unmetrical) **24d** चिच्छेदतुर् ] चिच्छेद वै R

---

**19** ] न चैव{न चे° $A_7$} तद्भीतो वाक्यैस्ते कृतं सपथं{समयं $A_4$, यलशपथं $A_7$} पुरा। यतो हममृतं प्राप्य चामरत्वमवाप्तवान् **A**± ($A_7$ unmetrical) **20b** °न्हित्वासुरान्गतः ] °न् हत्वासुरान् सतः **A** **20c** स्नेहेन ] स्नेहे च **A** **20d** मा शङ्कां ] $A_7$, नाशंका $A_3A_4$ **21b** चाव° ] वा च **A** **22b** वा बलेन ] वा रणेन $A_3A_4$, वारुणेन $A_7$ **22c** शत्रून् ] $A_3^{pc}A_4A_7^{pc}$, शत्रुन् $A_3^{ac}A_7^{ac}$ **22d** मा नश्यन्तु ] अद्य सन्तु **A** • दितेः ] $A_3A_7$, हितेः $A_4$ **23a** स तं ] $A_3^{ac}$, शतं $A_7$, सूतं $A_3^{pc}A_4$ **24a** एवाथ ] एवाशु $A_4A_7$, एवासु $A_3$ **24c** °राशीविषा° ] $A_3A_7$, °रासिर्विषा° $A_4$ • °कारै° ] $A_3A_4$, °कारेन° $A_7$ (unmetrical) **24d** चिच्छेदतुर् ] चिच्छेद तं **A**

---

**19**⟨$a^1$–$a^3$⟩($a^4$)⟨$a^5$⟩($a^6$) $S_1$ **22**⟨$a^1$–$a^4$⟩($a^5$–$a^7$, $c^2$) $S_1$ **24**($a^5$, $d^6$–$d^7$) $S_1$

---

**19ab** ] $S_3$, ⏓ ⏓ ⏓ ⏓ी ⏑(वा)क्यम्ये कृतो हमपरः पुरा⟨ः⟩ $S_1$, न चाप्यविदितं तेद्य कृतो यत् शपथः पुरा Bh (conj.) **19c** °वामृतपश्चाहं ] $S_1$Bh, °व चामृतः पश्चान् $S_3$ **19d** मृत्युर्म° ] em. Bh (silently), मृत्यु म्म° $S_1$, मृत्यु म° $S_3$ **20b** देवान् ] $S_1$**A**Bh, देवा $S_3$ • °रान्गतः ] em., °रां शतः $S_1$, °राङ्गत $S_3$, °रान् श्रितः Bh (conj.?) **20d** शङ्कां त्वं ] R$A_7$Bh (em.?), शंका त्वं $S_1S_3$ • मयि ] $S_3$R**A**Bh, मपि $S_1$ **21a** चन्द्रमसा ] $S_1$R**A**Bh, चन्द्रमसो $S_3$ **21b** चाव° ] $S_3$, चोप° $S_1$Bh • °पीडितम् ] $S_3$R**A**Bh, °पीडिताः $S_1$ **21c** त्राहि ] $S_1^{pc}S_3$**A**Bh (cf. R), (ब्रू)हि $S_1^{ac}$ • महाबाहो ] $S_3$R**A**Bh, महामोहो $S_1$ **22a** इमं रथं ] $S_3$R**A**, मायामथ Bh (conj.?) **22c** शत्रून्म° ] $A_3^{pc}A_4A_7^{pc}$Bh, शत्रुम्म° $S_1$, शत्रूम्म° $S_3^{pc}$, शत्रू म° $S_3^{ac}$ **22d** नश्यन्तु ] $S_3$R, तुषन्तु $S_1$ (or नु°), रुषन्तु Bh (conj.?) • दितेः सुताः ] R$A_3A_7$Bh, दितेः सुता $S_1$, दिते सुताः $S_3$ **23b** पक्षिराजं ] $S_3$R**A**Bh, पक्षिराज $S_1$ **24a** °पतत ] $S_3$R**A**Bh, °पत(न्त) $S_1$ **24b** °वह्निश्चन्द्रमास्त° ] R**A**Bh, °वह्नि चन्द्रमास्त° $S_1$, °वह्नि चन्द्रमा त° $S_3$ **24c** °राशीविषा° ] $S_1^{pc}S_3$R$A_3A_7$Bh, °राविषा° $S_1^{ac}$ (unmetrical) **24cd** °कारैर्ध्वजं ] R$A_3A_4$Bh, °कारेः ध्वज $S_1$ (tops lost), °कारै ध्वज $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

तथा ललाटे विद्धैनं तौ देवौ शशिपावकौ।
युगान्ताम्बुदवद्भास नादमुच्चैः प्रचक्रतुः॥ २५॥
तयोस्तल्लाघवं दृष्ट्वा हिरण्याक्षः प्रतापवान्।
आग्नेयेनास्त्रमुख्येन शिशिरं तद्व्यनाशयत्॥ २६॥
तुषारवर्षं तं दग्ध्वा ततो ऽसौ मायया पुनः।
संमोहयित्वा वेगेन राहुर्भूत्वाभिदुद्रुवे॥ २७॥
स राहुणा तदा तेन ग्रस्यमानः खगेश्वरः।
रणं त्यक्त्वान्यतो यातस्ततो दैत्यो ननाद ह॥ २८॥
दानवापि हि ते सर्वे नष्टे तस्मिन्हिमाशये।
समाश्वस्य पुनश्चक्रुर्युद्धं सुरगणैः सह॥ २९॥

---

**25a** तथा ] तदा R **25b** तौ देवौ ] देवौ च R **25d** After this R adds two pādas reading तुषारञ्चान्धकारञ्च कृत्वाच्छाद्य च दानम्। (unmetrical) **26d** शिशिरं ] तिमिरं R **27a** ◦वर्षं तं ] ◦वर्षन्तद् R **27c** संमोहयित्वा ] मोहयित्वाथ R **27d** ◦त्वाभि◦ ] ◦त्वाथ R **28a** राहुणा ] राहुना R **28b** ◦नः खगेश्वरः ] ◦नस्तु वै द्विज R • After this R adds two pādas reading तदा शशी च संत्रस्तो द्रुतं राहुभयात् पुनः। **28d** ◦स्ततो ] ◦स्तदा R **29a** दानवापि हि ] दानवाश्चापि R **29b** नष्टे तस्मिन्हिमाशये ] तस्मिन्नष्टे हिमांशुके R **29c** समाश्वस्य ] समाश्वास्य R

---

**25a** विद्धैनं ] $A_4A_7$, विद्धैवं $A_3$ **25c** ◦द्भास ] $A_3A_7$, ◦द्धास $A_4$ **26d** शिशिरं तद्व्य◦ ] तिमिरं तं व्य◦ $A_3A_4$, तिमिरं व्य◦ $A_7$ (unmetrical) • ◦नाशयत् ] $A_3A_7$, ◦नाशयन् $A_4$ **27a** दग्ध्वा ] दृष्ट्वा **A** **27d** ◦त्वाभि◦ ] ◦त्वा वि◦ **A** **28a** राहुणा ] $A_4$, राहुना $A_3A_7$ **28b** ग्रस्यमानः ] $A_3A_4$, ग्रस्यमालः $A_7$ **28c** रणं ] $A_3A_7$, वनं $A_4$ **28cd** यातस्त◦ ] $A_3A_4$, जातो जातः त◦ $A_7$ (unmetrical) **29b** नष्टे ] दुष्टे **A** • ◦न्हिमाशये ] ◦न्हिमांसये{◦वे $A_7$} **A** **29c** ◦श्चक्रुर् ] $A_3A_4$, ◦श्चक्रु $A_7$

---

**25**(c[7]) $S_1$

---

**25a** तथा ] $S_1S_3$**A**, ततो Bh (conj.?) • विद्धैनं ] $RA_4A_7Bh$, बिध्वैनं $S_1$, विध्वेनं $S_3$ **25c** ◦द्भास ] $S_1^{pc}S_3RA_3A_7Bh$, (◦द्या)स $S_1^{ac}$ **25d** ◦मुच्चैः ] R**A**Bh, ◦मुच्चै $S_1$, ◦मुचैः $S_3$ (unmetrical) **26a** तयोस्तल्लाघवं ] $S_1$R**A**Bh, स्तयोस्त लाघव $S_3$ (unmetrical) **26b** हिरण्याक्षः ] $S_3$R**A**Bh, हिरण्याक्ष $S_1$ **26c** आग्नेये◦ ] $S_1$R**A**Bh, अग्नेये◦ $S_3$ • ◦मुख्येन ] $S_3$R**A**Bh, ◦मुच्येत $S_1$ **26d** शिशिरं तद्व्य◦ ] conj. Bh, तिमिरन्त ध्य◦ $S_1$, तिमिरन्त व्य◦ $S_3$, • ◦नाशयत् ] $S_3RA_3A_7$, ◦शातयत् $S_1$Bh **27a** ◦वर्षं तं दग्ध्वा ] em., ◦वर्षणन्दग्ध्वा $S_1^{pc}$, ◦वर्षण (दृष्ट्वा) $S_1^{ac}$, ◦वर्षन्तं दृष्ट्वा $S_3$, ◦वर्षणं दग्ध्वा Bh **27b** ऽसौ ] $S_3$R**A**Bh, सो $S_1$ **27d** राहुर् ] $S_1$R**A**Bh, राहु $S_3$ • ◦त्वाभिदुद्रुवे ] $S_3$Bh (conj.), ◦त्वा विदुद्रवः $S_1$ **28a** राहुणा ] $A_4$Bh (em.?), राहुना $S_1S_3$ **28b** ग्रस्यमानः ] $A_3A_4$Bh, ग्रस्यमान $S_1$, ग्रस्यमाना $S_3$ **28c** रणं त्यक्त्वान्यतो ] $S_3RA_3A_7Bh$, रण त्यक्षो भ्यतो $S_1$ (retraced) **28cd** यातस्त◦ ] $S_1RA_3A_4Bh$, यस्त◦ $S_3$ (unmetrical) **28d** दैत्यो ] $S_3$R**A**Bh, दित्यो $S_1$ • ह ] $S_3$R**A**Bh, हः $S_1$ **29a** दानवापि हि ] $S_1S_3$**A**, दानवा ह्यपि Bh (conj.) **29b** नष्टे ] $S_1^{pc}S_3$Bh (cf. R), वष्टे $S_1^{ac}$ • ◦माशये ] $S_3$Bh (em.?), ◦माशयेत् $S_1$ **29cd** ◦श्चक्रुर्यु◦ ] $S_3RA_3A_4Bh$, ◦श्चक्रु य्यु◦ $S_1$ **29d** ◦गणैः सह ] R**A**Bh, ◦गणैः सहः $S_1$, ◦गणै सह $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

ते ऽम्बुदाशनिसमुद्रवेगसमनादिनो
 दैत्यदानवमहारथप्रवरसादिनः।
आश्वसन्त पुनरेव युद्धजयकांक्षिणो
 दर्पिता इव महागजा वनमपाश्रिताः॥ ३०॥

इति स्कन्दपुराण एकनवतितमो ऽध्यायः॥ ९१॥

---

**30a** ◦वेगसम◦ ] om. R **30b** ◦महारथप्रवर◦ ] ◦रथप्र◦ R **30c** युद्धजय◦ ] om. R **30d** महागजा ] $R^{pc}$, गजा $R^{ac}$ (unmetrical) • वनमपाश्रिताः ] वने R **Col.** इति स्कन्दपुराणे रेवाखण्डे ऽध्यायः R

---

**30a** ◦वेगसम◦ ] ◦समवेगा◦{◦ग◦ $A_3$} **A** (unmetrical) **30c** युद्ध◦ ] युद्धं **A** (unmetrical) • ◦जय◦ ] $A_3A_7$, ययुः $A_4$ (unmetrical) **30d** महागजा वन◦ ] गजा बल◦ **A** (unmetrical) • ◦मपाश्रिताः ] $A_7$, ◦मयान्विताः $A_3A_4$ **Col.** इति{इति श्री◦ $A_3$} स्कन्दपुराणे एकाशीतिसाहस्र्यां संहिताया{इति स्कंद◦ $A_4$}मम्बिकाखण्डे चन्द्रभङ्गो नामाध्यायः **A**±

---

**30a** ◦समुद्रवेगसम◦ ] conj., ◦सन्नादसमुद्रसम◦ $S_1$ (unmetrical), ◦समुद्रसमा◦ $S_3$ (unmetrical), ◦सन्नादाः समुद्रसम◦ Bh (conj.?, Bh corrects pāda a to two pādas of śloka metre) • ◦नादिनो ] $S_3$**RA**, ◦नादितः। $S_1$, ◦नादिताः Bh (conj.?) **30b** ◦दानव◦ ] $S_1$R**A**Bh, ◦दा⟨॥⟩+नवे+॥ $S_3$ (unmetrical) • ◦रथ◦ ] $S_3$**RA**, ◦रथा $S_1$, ◦रथाः Bh (em.?) **30bc** ◦नः। आश्वसन्त ] $S_3$**RA**, ◦नः आश्वसन्तः। $S_1$ (unmetrical), ◦न आश्वसन्तः। Bh (unmetrical) **30c** पुनरेव ] $S_1S_3$**RA**, – – तनेव Bh (Bh possibly reads this in $S_1$; unmetrical) • ◦जय◦ ] $S_3A_3A_7$, om. $S_1$Bh (unmetrical) **30d** दर्पिता ] $S_3$**RA**, दष्ट्रिना $S_1^{pc}$, दष्टिना $S_1^{ac}$, दंष्ट्रिन Bh (conj.?, unmetrical) • महागजा ] $S_3R^{pc}$Bh (conj.?), मदागजा $S_1$ • ◦मपाश्रिताः ] $A_7$, ◦समाश्रिता इति $S_1$ (इति part of col.), ◦मपाश्रिता $S_3$, ◦समाश्रिताः Bh **Col.** ⊙॥ स्कन्दपुराणे युद्धे आ(ध्यायः १४)७ (in letter numerals)॥ ⊙ $S_1$, ⊙॥ स्कन्दपुराणे नामाध्यायः ९१ (in letter numerals)॥ ⊙ $S_3$, इति स्कन्दपुराणे युद्धे एकनवतितमोध्यायः Bh

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

# द्विनवतितमो ऽध्यायः ।

सनत्कुमार उवाच ।
नक्षत्राधिपतिं दृष्ट्वा भगवान्हव्यवाहनः ।
विद्रुतं दानवभयात्पदातिः समधावत ॥ १ ॥
स शरैर्दानवरथं ससूतं सह वाजिभिः ।
सध्वजं सपताकं च भस्मसायुज्यमानयत् ॥ २ ॥
ततो ऽस्य कार्मुकं दिव्यं शरेणानतपर्वणा ।
विज्यं चकार संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३ ॥
अथान्धकश्च राहुश्च प्रह्लादो मय एव च ।
अन्ये च दानवश्रेष्ठाः कृशानुं पर्यवारयन् ॥ ४ ॥
सो ऽवप्रुत्य तदा तेषां धनूंषि च रथांस्तथा ।
ध्वजानि च विचित्राणि ददाह च ररास च ॥ ५ ॥
कवचानि विचित्राणि शिरांसि च वसूत्तमः ।
ददाह विकृताकारो नादयन्सर्वतोदिशः ॥ ६ ॥

---

**3c** विज्यं ] विद्धज् R **3d** चाब्रवीत् ] चाब्रववीत् R (unmetrical) **4cd** °श्रेष्ठाः कृशानुं ] °श्रेष्ठा युद्धार्थं R **5a** ऽवप्रुत्य ] ऽपप्लुत्य R

---

**2a** शरै° ] रथै° **A** **2d** °सायुज्य° ] $A_3A_4$, °साद्युह्य° $A_7$ **3b** शरेणा° ] समरे **A** **3c** विज्यं ] द्विधा $A_3A_4$, द्विधाज् $A_7$ • संक्रुद्ध° ] $A_4$, स क्रुद्ध° $A_3A_7$ **4c** दानव° ] बहवः **A** • °श्रेष्ठाः ] $A_3$, °श्रेष्ठा $A_4A_7$ **4d** कृशानुं ] कृच्छ्रा{°च्छा° $A_4$}त्तं **A** **5a** ऽवप्रुत्य ] वप्लुत्य $A_4$, पप्लुत्य $A_3A_7$ **5b** धनूंषि ] $A_3$, धनुंषि $A_4$, धनुंसि $A_7$ • रथांस्त° ] $A_3A_7$, रथं त° $A_4$ **5c** ध्वजानि च ] स ध्वजानि **A** **6b–8a** ] om. $A_3A_4$ **6b** शिरांसि च वसूत्तमः ] सरांसि च वसुत्तमः $A_7$ **6c** विकृता° ] विधृता° $A_7$

---

Manuscripts available for this chapter: $S_1$ 4.15b (f. 145$^v$), 4.14b (f. 146$^r$) and 4.15a (f. 146$^v$); $S_3$ f. 147$^r$–147$^v$; R f. 165$^v$–166$^r$; $A_3$ f. 97$^v$–98$^r$; $A_4$ f. 140$^r$–140$^v$; $A_7$ f. 137$^v$–138$^r$.
**1**($a^6$–$a^7$) $S_1$ **3**($d^1$–$d^2$) $S_1$

---

**1a** नक्षत्राधि° ] $S_1$R**A**Bh, नक्षत्राणि $S_3$ **1d** °तिः समधावत ] R**A**, °तिर्यमथागतः $S_1$, °ति समाधवतः $S_3$ (unmetrical), °तिर्योद्धुमुद्यतः Bh (conj.) **2a** शरैर् ] $S_1$RBh, शरै $S_3$ • °रथं ] R**A**Bh, °रथां $S_1$, °भयं $S_3$ **2b** वाजिभिः ] $S_3$R**A**, °वाजिनः $S_1$, °वाजिनम् Bh (em.) **2d** भस्म° ] $S_3$R**A**Bh, दस्स° $S_1$ • °सायुज्य° ] $S_1RA_3A_4$Bh, °सायोज्य° $S_3$ • °मानयत् ] $S_3$R**A** Bh, °पादयत् $S_1$ **3c** विज्यं चकार ] em. Bh (silently), विज्यञ्चकारं $S_1$, धिज्यं चकार $S_3$ **3cd** संक्रुद्धस्ति° ] $RA_4$Bh (em.?), सङ्क्रुद्ध (ति°) $S_1$, स क्रुद्धस्ति° $S_3$ **4a** अथान्धक° ] $S_1$R**A**Bh, अथ न्धक° $S_3$ **4b** प्रह्लादो ] $S_1$R**A**Bh, प्रह्रादो $S_3$ **4c** °श्रेष्ठाः ] $A_3$Bh, °श्रेष्ठा $S_1$, °श्रेष्टो $S_3$ **4d** कृशानुं ] conj. Bh (silently), कृशान्तं $S_1$, कृशानु $S_3$ (unmetrical) • °वारयन् ] R**A**Bh, °वारयत् $S_1S_3$ **5a** ऽवप्रुत्य ] $S_3$, वप्लुत्य $S_1$Bh **5ab** °षां धनूंषि ] $S_1RA_3$Bh, °षान्धनूषि $S_3$ **5b** च ] $S_1S_3$R**A**, च च Bh (typo, unmetrical) • रथांस्त° ] $RA_3A_7$Bh, रथास्त° $S_1S_3$ **5c** विचित्राणि ] $S_3$R**A**Bh, विचित्त्रा $S_1$ (unmetrical) **6b** शिरांसि ] $S_1$RBh, शरांसि $S_3$ • वसूत्तमः ] $S_3$RBh (em.?), वसूत्तम $S_1$ **6c** ददाह ] $S_3RA_7$Bh (em.?), दादाह $S_1$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

हाहेति नदतां तत्र भगवान्हव्यवाहनः ।
जिह्वा दहन्बभौ व्यास गुहायां दीपवत्स्थितः ॥ ७ ॥
केषांचित्प्रदहन्भाति दानवानां मुखानि सः ।
पङ्कजानीव फुल्लानि तिमिरारिर्महाप्रभः ॥ ८ ॥
केषांचिद्भुजगेन्द्राभान्करान्काञ्चनभूषितान् ।
ददाह भगवान्वह्निर्दावाग्निर्भुजगानिव ॥ ९ ॥
शराञ्छरासनांश्चैव तथा खड्गपरिच्छदान् ।
ददाह भगवान्वह्निर्हस्त्यश्वमपि सर्वशः ॥ १० ॥
ते हन्यमाना दैत्येन्द्रा विशस्त्रा दुःखिता भृशम् ।
भ्रमन्ति वितनुत्राश्च तत्र तत्रैव सर्वशः ॥ ११ ॥
तेषां वह्निप्रदीप्तानां दह्यतां सुरविद्विषाम् ।
हिरण्याक्षः स्वयं राजा पर्जन्यः समपद्यत ॥ १२ ॥
स मेघभूतो दैत्येन्द्रस्तमग्निं वृष्टिभिस्तदा ।
अशामयत वेगेन संवर्तक इवाम्बुदः ॥ १३ ॥

---

**7a** नदतां ] नदते R **7c** जिह्वा दहन्बभौ ] जिह्वां ददाह स R **9b$^3$–10c$^3$** ] om. R (unmetrical) **10d** सर्वशः ] सर्व्वतः R **11a** हन्यमाना ] दह्यमाना R **11b** विशस्त्रा ] वित्रस्ता R **11cd** वितनुत्राश्च त° ] वीतवित्रासास्त° R **12d** समपद्यत ] समवर्त्तत R **13c** अशामयत ] अशाम्यत स R

---

**7a** हाहेति ] त्राहीति $A_7$ **7cd** ] जिह्वां वै दहते व्यास स दैत्यो दीनवत्सलः $A_7$ **8a** केषांचित्प्रदहन्भाति ] केशाञ्चित्प्रादहत्तानि $A_7$ **8c** °नीव ] $A_3A_4$, °नीह $A_7$ **9ab** ] om. **A** **10a** °ञ्छरासनांश्चै° ] °न् श{स° $A_7$}रासनं चै° **A** **10cd** ] om. **A** **11a** हन्यमाना ] दह्यमाना **A** **12d** पर्जन्यः ] $A_3A_4$, पर्य्यन्यः $A_7$ **13b** °स्तदा ] °स्तथा **A** **13c** अशामयत ] अशोषयत **A**

---

**8**(c$^2$, c$^6$) $S_1$ **9**(c$^8$, d$^3$–d$^5$) $S_1$ **10**(a$^5$–b$^6$)⟨b$^7$–b$^8$⟩ $S_1$, (c$^3$–c$^4$) $S_3$ **12**(c$^3$–c$^4$) $S_1$ **13**(d$^4$) $S_1$, (c$^7$–c$^8$)⟨d$^1$⟩(d$^2$) $S_3$

---

**7a** हाहेति ] $S_1$RBh, हादेति $S_3$ **7c** जिह्वा दहन् ] conj. Bh, जिह्वा दन्तं $S_1$, जित्वा दहन् $S_3$ **7d** °वत्स्थितः ] $S_1$RBh, °व स्थितः $S_3$ **8a** केषांचित् ] RBh (em.?), कैषाञ्चित् $S_1$, तेषाञ्चि $S_3$ • °दहन्भाति ] $S_3$R, °दहन्तानि $S_1$ (or °त्तानि), °दहत् तानि Bh **8b** दानवानां ] $S_1$R**A**Bh, दानावाना $S_3$ • सः ] $S_1$R**A**Bh, स $S_3$ **8c** °जानीव ] $S_3$R$A_3A_4$Bh, °जानिव $S_1$ • फुल्लानि ] $S_1$R**A**Bh, फुलानि $S_3$ (unmetrical) **9a** °द्भुजगेन्द्राभान् ] $S_3$R, (°द्भु)गजेन्द्राभां $S_1$, °त्तु गजेन्द्राणां Bh (conj.?) **9b** करान् ] $S_1$RBh, करा $S_3$ • °भूषितान् ] $S_3$Bh (em.?), °भूषिताम् $S_1$ **9c** °न्वह्निर् ] $S_1$**A**Bh, °न्वह्नि $S_3$ **9d** °वाग्निर्भुज° ] $S_3$**A**Bh, °वा(ग्नि भज°) $S_1$ (lower parts lost) **10a** शराञ्छरासनांश्चैव ] $S_1$, शरान्छरासनां चै $S_3$ (unmetrical), शरान् शराशनाञ्चैव Bh (typo) **10b** खड्ग° ] $S_3$**A**Bh, (गद°) $S_1$ (lower parts lost) • °परिच्छदान् ] **A**Bh, (°परि) ˘ ⏓ $S_1$, °परिच्छदाम् $S_3$ **10c** °वान्वह्निर् ] RBh (em.?), °वां वह्नि $S_1$, °वान्वह्नि $S_3$ **11a** हन्यमाना ] em. Bh (silently), हन्यमान $S_1$, हन्यमाता $S_3$ **11c** °तनुत्राश्च ] $S_1$**A**Bh, °तनुत्राणि $S_3$ **11d** सर्वशः ] $S_3$R**A**, सर्वकृत् $S_1$, – – – Bh **12b** दह्यतां ] $S_1$R**A**Bh, दह्यता $S_3$ • सुरवि° ] $S_1S_3^{pc}$R**A**Bh, सुर⟨द्वि⟩+वि°+ $S_3$ **12d** पर्जन्यः ] R$A_3A_4$Bh, पर्ज्जन्य $S_1$, पर्जन्य $S_3$ • समपद्यत ] $S_3$**A**Bh, समुपद्यतः $S_1$ **13c** अशामयत ] $S_3$, प्रशमेयत $S_1$, प्रशामयत Bh (conj.)

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

तं प्रशान्तं तदालक्ष्य विधुरं हव्यवाहनम् ।
विप्रचित्तिः शरैस्तीक्ष्णैर्ललाटे समवाकिरत् ॥ १४ ॥
ततो ऽस्य नदतो भूयो मयो दानवसत्तमः ।
मुखे शरं महाघोरं निचखान महासुरः ॥ १५ ॥
तस्य तेन तदा व्यास मुखे भिन्नस्य दारुणः ।
उत्तस्थौ वायुवद्धूमः शरीरादञ्जनोपमः ॥ १६ ॥
तेन धूमेन खं चैव दिवं भूश्चैव सर्वशः ।
पूरिता महता व्यास न प्रज्ञायत किंचन ॥ १७ ॥
तेन शब्देन संज्ञाभिर्नामविश्रावणैरपि ।
करस्पर्शैस्तदान्यो ऽन्यमनयद्यमसादनम् ॥ १८ ॥
न देवो ज्ञायते तत्र न दैत्यो दानवो ऽपि वा ।
अजानन्तस्ततस्तत्र संज्ञामेतां प्रचक्रिरे ॥ १९ ॥
आटिर्दैत्याः प्रकुर्वन्त बक इत्येव देवताः ।
बकं वदन्ति ये तत्र दैत्यास्तान्व्यहनंस्तदा ।
आटिं ब्रुवाणं च सुरा इत्येवं तद्व्यवर्तत ॥ २० ॥

---

**14b** विधुरं ] विह्वलं R **15a** नदतो ] नर्द्दतो R **17b** दिवं ] द्यौश्च R **17d** प्रज्ञायत ] प्राज्ञायत R **19c** ◦स्ततस्तत्र ] ◦स्तत्र तत्र R **20a** आटिर् ] आढिन् R • ◦कुर्वन्त ] ◦कुर्व्वन्ति R **20b** बक इ◦ ] बकमि◦ R **20c** तत्र ] यत्र R **20e** आटिं ब्रुवाणं च सुरा ] आढिं ब्रुवाणममरा R **20f** ◦वर्तत ] ◦वर्द्धत R

---

**14a** प्रशान्तं ] $A_3A_4$, प्रसान्तं $A_7$ **14b** विधुरं ] विधूमं **A** **15b** मयो ] $A_7$, माया◦ $A_3A_4$ **15c–16d** ] om. **A** **17b** दिवं भूश्चैव ] दिव्यं बाणैश्च **A** **17d** प्रज्ञायत ] $A_4A_7$, प्राज्ञायत $A_3$ • किंचन ] $A_3A_4$, किञ्चनः $A_7$ **18a** तेन ] तल◦ **A** **18ab** ◦भिर्नामविश्रावणैरपि ] ◦भिर्नामविप्रावरणैरपि $A_4$ (unmetrical), ◦भिरहिताभूच्च{भूरि $A_7$} देवता $A_3A_7$ **19c** अजानन्तस्त◦ ] अजानन्वै त◦ $A_3A_4$, अजानां वैस्त◦ $A_7$ **19d** संज्ञामेतां ] संग्रामं{◦मे $A_7$} तं **A** **20a** आटिर्दैत्याः ] आडि दैत्याः $A_3$, आदिर्दैत्या $A_4$, आटि दैत्या $A_7$ **20c** बकं ] वटं **A** **20d** दैत्यास्तान्व्यहनंस्त◦ ] दैत्यांस्तान् व्याहनं{◦तां◦ $A_3$}स्त◦ **A** **20f** ◦वर्तत ] $A_4A_7$, ◦कुर्वत $A_3$

---

**20**(c$^3$) $S_1$

---

**14a** प्रशान्तं ] $S_1S_3^{pc}RA_3A_4Bh$, प्रसा(दं) $S_3^{ac}$ **14c** विप्रचित्तिः ] $S_3$R**A**Bh, विप्रचित्ति $S_1^{pc}$, विप्रचित्तै $S_1^{ac}$ • ◦स्तीक्ष्णैर् ] $S_1$R**A**Bh, ◦स्तक्ष्णै $S_3$ **15c** शरं महाघोरं ] R, शरम्महाघोरां $S_1$, शरं माहाघोरं $S_3$, शरान् महाघोरान् Bh (em.?) **16b** भिन्नस्य ] $S_1$RBh, भिनस्य $S_3$ (unmetrical) **16c** ◦द्धूमः ] $S_3$RBh (em.?), ◦द्धूम $S_1$ **17b** दिवं ] $S_1$Bh, दिव $S_3$ • भूश्चैव ] RBh (em.?), भू चैव $S_1$, भु चैव $S_3$ (unmetrical) **17c** महता ] $S_3$R**A**Bh, महतो $S_1$ **17d** प्रज्ञायत ] $S_1S_3A_4A_7$, प्राज्ञायत Bh • किंचन ] $RA_3A_4Bh$, किञ्चनः $S_1S_3$ **18ab** संज्ञाभिर्ना◦ ] $S_1RA_4Bh$, संज्ञाभि ना◦ $S_3$ **18b** ◦श्रावणै◦ ] $S_3$RBh (em.?), ◦स्रावणै◦ $S_1$ **18c** ◦स्पर्शैस्त◦ ] R**A**Bh, ◦स्पर्शैर्त्त◦ $S_1$, ◦स्पशैस्त◦ $S_3$ **18cd** ◦दान्यो ऽन्यम◦ ] $S_3$R**A**Bh, ◦दान्यो न्येम◦ $S_1$ **19a** न ] $S_3$R**A**Bh, त $S_1$ **19d** संज्ञामेतां ] R, संस्थामेताम् $S_1$, संज्ञा तेषा $S_3$, संस्थामेतां Bh **20a** आटिर्दैत्याः ] $S_3$, अटि द्दैत्या $S_1$, आटिं दैत्याः Bh (conj.?) • ◦कुर्वन्त ] $S_3$**A**Bh, ◦कुर्वन्तः $S_1$ **20c** बकं ] $S_1$RBh, बक $S_3$ (unmetrical) **20d** दैत्यास्तान् ] $S_1$RBh, दैत्यास्ता $S_3$ **20e** आटिं ] $S_3$**A**Bh, अटि $S_1$ **20f** ◦वर्तत ] $S_3A_4A_7$Bh (em.?), ◦वर्ततः $S_1$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

**एतद्भूत्संज्ञया युद्धं वर्षाणां वै महाभयम्।**
**सहस्रमेकं दैत्यानामन्धकारे सुरैः सह॥ २१॥**
**तदन्धकारे सुमहाभयंकरं तदाभवद्युद्धमतीव दारुणम्।**
**जगद्विनाशाय जगद्धितैषिणां सुरासुराणां रुधिरौघनिस्रवम्॥ २२॥**

**इति स्कन्दपुराणे द्विनवतितमो ऽध्यायः॥ ९२॥**

---

**21a** एतद्भूत्संज्ञया ] तदभूत् संख्यया R **22a** सुमहाभ° ] सुमहद्भ° R **22d** °रौघनि° ] °रौद्यवि° R **Col.** इति स्कन्दपुराणे रेवाखण्डे ऽध्यायः R

---

**21a** एतद्भूत्सं° ] तदभूत्सं°{°त् स° $A_7$} **A** **21ab** °द्धं वर्षाणां ] $A_7$, °द्धमुर्खानां $A_4$, °द्धं मूर्खानां $A_3$ **21c** सहस्रमेकं ] $A_4$, सहस्रमेक $A_3$, सहश्रमेकं $A_7$ **21d** °कारे ] °कारो **A** **22a** तदन्धकारे सु° ] तदहंकारेषु **A** (unmetrical) • °भयंकरं ] $A_4A_7$, °भयंकर $A_3$ **22b** तदा° ] $A_7$, तद° $A_3A_4$ (unmetrical) **22d** °रौघनिस्रवम् ] °रौघ{°द्य° $A_3$}विस्रु{°श्रु° $A_7$}तं **A** **Col.** इति स्कन्दपुराणे एकाशीतिसाहस्रयां संहिताया{इति स्कंद° $A_4$}मम्बिकाखण्डे अग्निविग्रहो नामाध्यायः **A**±

---

**21**($a^8$–$b^2$) $S_1$ **22**($b^{12}$) $S_1$

---

**21a** एतद्भूत्संज्ञया युद्धं ] conj., एतद्भूतमयुद्ध(न्तु) $S_1$, एतद्भूत सज्ञया घोरं $S_3$ (unmetrical), एवंभूतमभूद्युद्धं Bh (conj.) **21b** वै महाभयम् ] $S_3$R**A**, वै महद्भयम् $S_1$, तु सहस्रकम् Bh (conj.) **21c** सहस्रमेकं ] $S_3RA_4$, सहस्रकेकन् $S_1$, महद्भयं वै Bh (conj.) **21cd** °नामन्ध° ] $S_3$R**A**Bh, °नां बन्ध° $S_1$ **21d** सुरैः ] $S_1$R**A**Bh, सुरै $S_3$ **22a** °भयंकरं ] $S_1A_4A_7$Bh, °भयंकर $S_3$ **22c** °द्धितैषिणां ] $S_1$R**A**Bh, °द्धितैषिणं $S_3$ **22d** सुरासुराणां ] R**A**Bh, सुरासुणां $S_1$ (unmetrical), सुराणां $S_3$ (unmetrical) • °निस्रवम् ] Bh, °निस्रवमिति $S_1^{pc}S_3$ (इति part of col.), °नैस्रवमिति $S_1^{ac}$ (इति part of col.) **Col.** ⊙॥ (स्कन्दपुरा) युद्धे आध्यायः १४८ (in letter numerals)॥ ⊙ $S_1$, ⊙॥ स्कन्दपुराणे नामाध्याय ९२ (in letter numerals)॥ ⊙ $S_3$, इति स्कन्दपुराणे युद्धे द्विनवतितमोध्यायः Bh

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

# त्रिणवतितमो ऽध्यायः।

सनत्कुमार उवाच।
अथासौ तेन कालेन केतुरग्नेः समुत्थितः।
वायुनाभिहतश्चैव अगच्छद्विलयं भृशम्॥ १॥
ततः समभवद्व्योम विमलं सर्वमेव ह।
अपश्यन्त सुराः सर्वे दैत्याश्चैव परस्परम्॥ २॥
ततः शङ्खाश्च भेर्यश्च पटहाडम्बरास्तथा।
सुघोषका डिण्डिमाश्च भम्भाः पेप्वश्च सर्वशः।
बलद्वये ऽप्यवाद्यन्त शतशो ऽथ सहस्रशः॥ ३॥
अथ शक्रश्च देवेन्द्रो यमो वैश्रवणस्तथा।
पूषा भगश्च द्वावेतावर्यमा मित्र एव च॥ ४॥
जयन्तो मरुतश्चैव रुद्रादित्याश्च सर्वशः।
वेगेन सुमहावेगा ममृदुर्दानवं बलम्॥ ५॥
तत्र चामीकराभासं प्रगृह्य बलवद्धनुः।
यमः पुण्ड्रेण दैत्येन्द्राननयद्यमसादनम्॥ ६॥

---

**1a** अथासौ ] तथासौ R **1b** समुत्थितः ] समुच्छ्रितः R **1c** ॰नाभिहत॰ ] ॰ना निहत॰ R **1d** अगच्छद् ] अगद् R (unmetrical) **2b** ह ] हि R **3c** सुघोषका ] आघोषका R **3d** भम्भाः पेप्वश्च ] डम्भा भेर्य्यश्च R **4b** वैश्रवण॰ ] वैश्रावन॰ R **4cd** ॰वेताव॰ ] ॰वेताम॰ R **4d** मित्र ] इन्द्र R **5a** जयन्तो मरुत॰ ] जयन्त{॰न्तो $R^{ac}$}(द्ध)तव॰ R **5d** ममृदुर् ] ममर्द्दु R **6c** यमः पुण्ड्रेण ] यमो दण्डेन R

---

**1b** ॰रग्नेः ] $A_4$, ॰रुग्रैः $A_3A_7$ **1d–5a** ] om. **A** **5b** ॰दित्याश्च ] $A_4$, ॰दित्यांश्च $A_3A_7$ **5c** वेगेन ] दुर्गेण{॰न $A_7$} **A** **5d** ॰र्दानवं ] ॰र्दान{॰नं॰ $A_7$}वा **A** **6b** प्रगृह्य ] संगृह्य $A_3A_4$, संग्रह्य $A_7$ • ॰वद्धनुः ] ॰बन्धनः **A** **6c** पुण्ड्रेण ] पुत्रेण **A** **6d** ॰ननयद् ] $A_3A_4$, ॰णलयद् $A_7$

---

Manuscripts available for this chapter: $S_1$ 4.15a (f. 146$^{v}$), 4.14a (f. 147$^{r}$) and 4.13b (f. 147$^{v}$); $S_3$ f. 147$^{v}$–148$^{v}$; R f. 166$^{r}$–167$^{r}$; $A_3$ f. 98$^{r}$; $A_4$ f. 140$^{v}$–141$^{r}$; $A_7$ f. 138$^{r}$–138$^{v}$ (**A** upto **20b**).
**3**(f$^{7}$) $S_1$

---

**1a** कालेन ] $S_3$R**A**Bh, काले $S_1$ (unmetrical) **1b** ॰रग्नेः ] R$A_4$Bh (em.?), ॰रग्ने $S_1S_3$ **1c** ॰हतश्चैव ] $S_3$R**A**Bh, ॰हत +चैव+ $S_1$ (unmetrical) **1d** ॰द्विलयं ] RBh (em.?), ॰द्विलयद् $S_1^{pc}S_3$, ॰द्विलद् $S_1^{ac}$ (unmetrical) **2a** ततः ] $S_1$RBh, तत $S_3$ (unmetrical) **2b** विमलं ] $S_1$RBh, विमल $S_3$ (unmetrical) • ह ] em., हः $S_1$, om. $S_3$ (unmetrical), हि Bh (conj.) **2c** सुराः सर्वे ] $S_1$RBh, सुरा सर्वै $S_3$ **3a** शङ्खाश्च ] $S_1$RBh, शखाश्च $S_3$ • भेर्यश्च ] $S_3$RBh (em.?), भेर्याश्च $S_1$ **3d** भम्भाः पेप्वश्च ] em., भग्ना भेर्याश्च $S_1$, भम्भा पेपुश्च $S_3$, भग्ना भेर्यश्च Bh (em.?) **4a** देवेन्द्रो ] $S_3$RBh (conj.), दैत्येन्द्रो $S_1$ **4c** भगश्च ] $S_1^{pc}S_3$RBh, भश्च $S_1^{ac}$ (unmetrical) **4cd** ॰वेतावर्यमा ] $S_3$, ॰वेतौ अन्यवा $S_1$, ॰वेतौ अर्यमा Bh (conj.?) **5b** ॰दित्याश्च ] $S_1$R$A_4$Bh, ॰दित्यश्च $S_3$ **5cd** ] $S_1$Bh, om. $S_3$ **6b** ॰द्धनुः ] $S_3$RBh (em.?), ॰द्धनु $S_1^{ac}$, ॰द्धतु $S_1^{pc}$ **6c** यमः पुण्ड्रेण ] $S_3$, यमः दण्डेन $S_1$, यमो दण्डेन Bh (em.?) • दैत्येन्द्रा॰ ] $S_3$R**A**Bh, दैत्येन्द्रो $S_1$ **6d** ॰ननयद् ] $S_1$R$A_3A_4$Bh, ॰नतयद् $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

स पञ्चभिः शरैर्विद्ध्वा हिरण्याक्षं महाबलम् ।
अन्यांश्चैकैकशः सर्वाञ्जहास च ननाद च ॥ ७ ॥
तस्य सर्वे तदायस्ता दैत्यदानवसत्तमाः ।
शरानाशीविषाकारान्व्यसृजन्विकृताननाः ॥ ८ ॥
तान्स चिच्छेद समरे त्रिधैकैकं लघुक्रियः ।
पुनश्च निशितैर्घोरैरर्दयत्प्रहसन्निव ॥ ९ ॥
ततो ऽन्धकस्य यन्तारं रथं च सह वाजिभिः ।
किंकरेण महावीर्यो यमो निन्ये स्वकं पुरम् ॥ १० ॥
ततो ऽन्धको गदापाणिर्युगान्ताम्बुदवन्नदन् ।
अभ्यधावद्यमं तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ११ ॥
तस्य वज्रेण देवेन्द्रो गदां हेमपरिष्कृताम् ।
बिभेद शतधा व्यास सापतद्भुव्यसुप्रभा ॥ १२ ॥
तं विशस्त्रं विकवचं कृत्वा ते देवसत्तमाः ।
युगपच्छस्त्रवर्षेण ताडयामासुराहवे ॥ १३ ॥
यमो दण्डेन तं मूर्ध्नि शक्रो वज्रेण चाहनत् ।
वित्तदो ऽशनिना चैव पाशेन वरुणस्तथा ॥ १४ ॥

---

**8ab** ॰दायस्ता दैत्य॰ ] ॰दायत्ता दैत्या R **9b** त्रिधैकैकं लघुक्रियः ] एकैकं लघुविक्रमः R **9c** ॰र्घोरै॰ ] ॰र्ब्बाणै॰ R **9d** ॰रर्दयत् ] ॰रर्द्दयन् R **12d** सापतद्भुव्यसुप्रभा ] पातयद्भुवि सुप्रभाम् R **13b** ते देवसत्तमाः ] वै देवसत्तमः R **13c** युगपच्छस्त्र॰ ] अपतच्छर॰ R **13d** ॰मासुरा॰ ] ॰मास चा॰ R **14c** वित्तदो ऽशनिना चैव ] वित्तेशो ऽपि च नाराचैः R

---

**7a** ॰र्विद्ध्वा ] $A_3A_4$, ॰र्व्विद्ध्वा $A_7$ **8–9** ] om. **A** **11a** ॰पाणिर् ] $A_3A_4$, ॰पानि $A_7$ **12b** ॰परिष्कृताम् ] $A_3A_4$, ॰परिस्कृतां $A_7$ **12d** सापतद्भुव्यसुप्रभा ] पपात भुवि सुप्रभा{॰भाः $A_7$} **A** **13c** ॰पच्छस्त्र॰ ] $A_3A_4$, ॰पत् सस्त्र॰ $A_7$ **14a** मूर्ध्नि ] $A_3$, मूर्द्धनि $A_4A_7$ **14d** ॰स्तथा ] ॰स्तदा **A**

---

**7**(d²) $S_1$ **12**⟨a⁶–b¹⟩(b⁵–b⁷, c⁷, d⁷) $S_1$ **14**(d³) $S_1$

---

**7a** शरैर्विद्ध्वा ] $S_1RA_3A_4$Bh, शरै विद्धा $S_3^{pc}$, शवै (भि)द्धा $S_3^{ac}$ **7b** ॰क्षं महाबलम् ] $S_3$R**A**Bh, ॰क्ष+महा+म्बलम् $S_1$ **7c** अन्यांश्चै॰ ] R**A**, अन्याश्चै॰ $S_1S_3$, अश्वांश्चै॰ Bh (conj.?) **7d** ॰ञ्जहास ] $S_1^{pc}S_3$R**A**Bh, ॰ञ्जजस $S_1^{ac}$ (unmetrical) **8b** ॰सत्तमाः ] $S_1$RBh, ॰सत्तमा $S_3$ **8cd** ॰रान्व्यसृजन् ] RBh (em.?), ॰रा ध्यसृज्ञद् $S_1$, ॰रां व्यसृजद् $S_3$ **8d** ॰ताननाः ] R, ॰ताशनात् $S_1$, ॰ताननात् $S_3$, ॰ताशनान् Bh (em.?) **9b** ॰क्रियः ] $S_3$Bh (em.?), ॰कियः $S_1$ (unmetrical) **9c** निशितैर् ] $S_1$R, निशिते $S_3$, विशिखैर् Bh (conj.) **9d** ॰रर्दयत् ] em. Bh (silently), ॰रर्द्धयत् $S_1$, ॰रार्द्दयत् $S_3$ **10c** किंकरेण ] $S_3$R**A**Bh, किंकारेण $S_1$ **10d** ॰कं पुरम् ] $S_3$R**A**Bh, ॰कम्पुनः $S_1$ **11a** ॰पाणिर् ] $S_3RA_3A_4$Bh, ॰पाणि $S_1$ **11b** ॰न्नदन् ] $S_3$R**A**Bh, ॰न्नदम् $S_1$ **11c** ॰द्यमं तूर्णं ] $S_3$R**A**Bh, ॰द्यमन्तुर्ण्णं $S_1^{pc}$ ?, ॰द्यम⊔ $S_1^{ac}$ ? **12b** गदां ] R**A**Bh, ⏑दा $S_1$, गदा $S_3$ • ॰परिष्कृताम् ] $S_1^{pc}S_3RA_3A_4$Bh, (परिष्कृ)तिम् $S_1^{ac}$ **12d** सापतद् ] $S_3$Bh (conj.?), मापतद् $S_1$ • ॰व्यसुप्रभा ] $S_3$, ॰व्यव(स्थि)ताः $S_1$, ॰व्यवस्थिता Bh (em.?) **13b** ॰सत्तमाः ] $S_1$**A**Bh, ॰सत्तमा $S_3$ **13c** ॰पच्छस्त्र॰ ] $S_3A_3A_4$Bh, ॰पच्छ्रस्त्र॰ $S_1$ **14a** तं ] $S_1$R**A**Bh, त $S_3$ (unmetrical) **14b** चाहनत् ] $S_1$R**A**Bh, वाहनत् $S_3$ **14c** वित्तदो ] **A**Bh, वित्तादा॰ $S_1$, वित्तेशो $S_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-38351-7
Downloaded from Brill.com03/21/2019 11:48:03AM
via free access

अन्ये चान्यैस्तथा देवा अमोघैरायुधोत्तमैः ।
अभ्यधावन्त संरब्धा हतस्त्वमितिवादिनः ।
न चैव तस्य दैत्यस्य दुःखं तत्राभवत्तदा ॥ १५ ॥
सो ऽपि दैत्यस्तदोत्पत्य पुण्ड्रस्यास्थाय पृष्ठतः ।
यमं मुष्टिप्रहारेण पुण्ड्राद्भूमावपातयत् ॥ १६ ॥
तथेन्द्रस्य गजं भूयो पुच्छे संगृह्य वेगवान् ।
भ्रामयित्वाक्षिपद्दूरं नष्टस्त्वमिति चाब्रवीत् ॥ १७ ॥
ततो धनेशस्य पुनः शिबिकां कामगामिनीम् ।
आक्षिप्य बहुधा दैत्यो व्यधमत्क्रोधमूर्छितः ॥ १८ ॥
ततो गजैर्गजान्निघ्नन्पदातींश्च पदातिभिः ।
रथं रथेन च रणे हयांश्च हयसादिभिः ॥ १९ ॥
पुनर्गजं महेन्द्रस्य हन्यमानो ऽपि संयुगे ।
अवप्लुत्य तदा शक्रं गजस्कन्धान्न्यपातयत् ॥ २० ॥

---

**15c** संरब्धा ] तं रध्वा R **16b** पुण्ड्रस्यास्थाय ] स्थित्वा पुण्ड्रस्य R **16d** पुण्ड्राद् ] पुण्ड्रां R **17a** भूयो ] भूयः R **17c** °त्वाक्षिपद् ] °त्वा कियद् R **18c** आक्षिप्य बहुधा ] आदाय तरसा R **19ab** °न्निघ्नन्पदातींश्च ] °न्नि{°न° $R^{ac}$}घ्नन् पदातांश्च R **19b** पदातिभिः ] पदातयः R **19d** हय° ] सह R **20a** °र्गजं ] °र्ध्वजं R **20b** हन्यमानो ] दृश्यमानो R **20c** अवप्लुत्य ] अवप्लुत्य R

---

